INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

Field	Entry	Field	Entry
RECORD NO.		LANGUAGE	SANSKRIT संस्कृत
ROLL NO. / Date of Filming			
ACC NO	3730	SCRIPT	DEVANĀGARĪ देवनागरी
Ms. No.	G. NO. 1230		
Bundle No.			
DESC. CAT. NO.		MATERIAL	PAPER कागद
DESCRIPTIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME	VOL. II (CLASSICAL LITERATURE) PART - I		
AUTHOR	JAYADEVA जयदेवः	NO OF FOLIOS PAGES	FOLIOS - 143
TITLE	GITAGOVINDA WITH COM. PADADYOTANIKĀ गीतगोविन्द-टि पदद्योतनिकाटीकासहितम्	COMPLETE/INCOMPLETE	COMPLETE पूर्ण
WITH OR WITHOUT COMMENTARY	WITH COMMENTARY COM: NĀRĀYANA टी० : नारायण	REMARKS	DATE OF MS : VIKRAMA ERA - 1963 संवत् SIZE: 22X11 CMS LINES: 9 LETTERS: 32
SUBJECT	KĀVYA काव्यम्	LOCATION	SCINDIA ORIENTAL INSTITUTE VIKRAM UNIVERSITY UJJAIN - 456010 (M.P.)

विविद्-6.98-202-447

सिन्धिया प्राच्यविद्या शोध प्रतिष्ठान

विक्रम विश्वविद्यालय, उज्जैन-456 010 (भारत)

हस्तलिखित-संग्रह

क्रमांक 3730 कपाट .... विषय काव्य भाषा संस्कृत

ग्रन्थनाम श्रीगीतगोविन्द-पदद्योतनिका टीका सहित

ग्रन्थकार जयदेव टी. नारायण

लेखनकाल सं. 1863 आषाढ़ 5 रविवार लिपि देवनागरी

आकार 22X11 .... सं. मौ. पत्र-संख्या 143 पं. 9 अक्षर 32

लेखन-द्रव्य कागज दशा स्थिति उत्तम एवं पूर्ण

प्रवेश तिथि .... विशेष अल्पदाता - ठा. भुवे सहेल

जागीरदार फतेपुर सिक्री।

उ॰

॥ ॥अथगीतगोविंदसटीकप्रारंभः॥

गी गो. ॥श्रीगणेशायनमः॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्लोक॥ ॥मेघैर्मेदुरमंबरं
१ वनभुवः श्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेग्रहं प्रापय ॥ इत्थंनंदनिदे
शतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः॥१॥
वाग्देवताचरितचित्रितचित्तसद्मापद्मावतीचरणचारणचक्रवर्ती।श्रीवासुदेव
ति रतिकेलिकथासमेतमेतंकरोंजयदेवकविःप्रबंधं॥२॥यदिहरिस्मरणेसरसंमनोय
दिविलासकलासुकुतूहलं॥मधुरकोमलकांतपदावलींशृणुतदाजयदेवसरस्वतीं
॥३॥वाचःपल्लवयत्युमापतिधरःसंदर्भशुद्धिंगिरांजानीतेजयदेवएवशरणःश्लाघ्यो
दुरूहद्रुते॥शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनःस्पर्द्धीकोपिनविश्रुतःश्रुतिध
रोधोयीकविक्ष्मापतिः॥४॥आदितालेमध्यमादिरागेलघुरेकःरूपं ॥अष्टपदी॥ राम०
१

प्रलयपयोधिजलेधृतवानसिवेदं॥विहितवहित्रचरित्रमखेदं॥१॥ केशवधृतमी
नशरीरजयजगदीशहरे॥२॥क्षितिरतिविपुलतरेतवतिष्ठतिपृष्ठेधरणिधरणकिणच
क्रगरिष्ठे॥३॥ केशवधृतकछपरूप॥जय०॥४॥वसतिदशनशिखरेधरणी
तवलग्ना॥शशिनिकलंककलेवनिमग्ना॥५॥ केशवधृतशूकररूप०॥६॥
तवकरकमलवरेनखमद्भुतशृंगं॥दलितहिरण्यकशिपुतनुभृंगं॥७॥
केशवधृतनरहरिरूप०जय०॥८॥छलयसिविक्रमणेबलिमद्भुतवामन॥पदनखनी
रजनितजनपावन॥९॥केशवधृतवामनरूप०जय॥१०॥क्षत्रियरुधिरमयेजगदप
गतपापं॥स्नपयसिपयसिशमितभवतापं॥११॥केशवधृतभृगुपतिरूप०जय०॥१२॥
वितरसिदिक्षुरणेदिक्पतिकमनीयं॥दशमुखमौलिबलिंरमणीयं॥१३॥केशवधृत

गी०टी०
२

विशदे१ श्लो० ९

रामशरीर०जय०॥१४॥ वहसि वपुषि विसदे वसनं जलदाभं॥ हलहतिभीतिमिलितयमुनाभं॥ केशव धृतहलधररूप० जय०॥१६॥ निंदसि यज्ञविधेरहह श्रुतिजातं॥ सदयहृदयदर्शितपशुघातं॥१७॥ केशवधृतबुद्धशरीर० जय०॥१८॥ म्लेछनिवहनिधने कलयसि करवालं॥ धूमकेतुमिव किमपि करालं॥१९॥ केशवधृतकल्किशरीर॥ जय०॥२०॥ श्रीजयदेवकवेरिदमुदितमुदारं॥ शृणु सुखदं शुभदं भवसारं॥२१॥ केशवधृतदशविधरूप॥ जय०॥२२॥ इति श्रीदशावतारकीर्तिधवलनामा प्रथमः प्रबंधः॥१॥ ॥श्रीगणेशायनमः॥

कदाचित्ग्रामात्गोदोहनाय सुतेन सह गतः॥ स नंदो गोपो राधिकां प्राह॥ किमाह॥ तत्तस्मात्कारणात्॥ हे राधे इमं कृष्णं त्वमेव गृहं प्रापय तस्मादिति कस्मात्। यस्मात्कारणात् अंबरमाकाशं मेघैर्मेदुरं स्निग्धं तमोव्याप्तमित्यर्थः॥ तथा वनभुवः श्यामाः अंधकारयुक्ताः राम० २

किंकृता तमालद्रुमैः॥ नीलतमालतरुभिः॥ अयं च पुनः कृष्णो नक्तं तमिस्रायां भीरुः भयनशीलः तस्मात्त्वमेव गृहं प्रापय इत्थं मनेन प्रकारेण नंदनिदेशतः॥ नंदस्य निदेश आज्ञा तस्माच्चलितयोः॥ राधामाधवयोः रहः केलयः एकांतक्रीडाः जयंति॥ सर्वक्रीडोत्कृष्टत्त्या वर्तंते॥ एकांतार्थे रहो ऽव्ययं द्वंद्वे ऽनभ्यर्हितस्यापि पूर्वनिपातः॥ राधा नारायणाविति दर्शनात्॥ राधा च माधवश्च [illegible]॥ राधामाधवौ॥ तयोः कं प्रत्यध्वकुंजद्रुमं कुंजेन लतापिहितोदरेण युक्तो द्रुमो॥ अध्वनि मार्गे कुंजद्रुमः॥ अध्व. कुंजद्रुमः॥ अध्वकुंजद्रुमं प्रतीति प्रत्यध्वकुंजद्रुमं। तस्मिन्। प्रत्यध्वकुंजद्रुमं॥ इत्यव्ययीभावः। प्रतिनासह योगे कर्मप्रवचनाद्वितीया वा॥ मार्गे यत्र कुंजसहितो द्रुमाः॥ तस्मिन् केलिं कृतवानित्यभिप्रायः॥ कस्मिन्प्रदेशे यमुनाकूले यमुनायाः कूलं तीरं तस्मिन्॥ एवं कृतमंगलाचरणः

इतिकुंजद्रुमः ४

गी॰गो॰ ३ संचिकीर्षितप्रतिज्ञामादौकरोति ।।१।। वाग्देवतेति ।। ७ ।। एवंवक्ष्यमाणंप्रबंधंजय
देव । कविः करोतिकरिष्यतीत्यर्थेवर्त्तमानसामीप्येवर्त्तमानवद्वेतिसूत्रं ।। किंभूतंश्री
वासुदेवरतिकेलिकथासमेतंवसंत्यस्मिन्परमात्मनिभूतानिजीवाजीवरूपेणेतिवासुः
।। सचासौदेवोद्योतनात्मकश्चेतिश्रीवासुदेवःपूज्यार्थेश्रीशब्दःप्रयुज्यते ।। तस्यस्वमाया श्री
विशंनंरतिः तस्यकेलयः ।। क्रीडानखक्षतादिरूपास्तासांकथास्ताभिःसमेतोयुक्तः
। तं । किंभूतोजयदेवकविः । वाग्देवताचरितचित्रितचित्तसद्मा । वाक्सरस्वतीचा
सौदेवताचवाग्देवतातस्याश्चरितंतेनचित्रितंमंडितंचित्तसद्मचित्ताख्यंमंदिरंय
स्यसतथा । किंभूतः पद्मावतीचरणचारणचक्रवर्त्ती ।। पद्मावत्याःस्वकांतायाश्च राम॰
रणौपादौतयोश्चारणंचालनंतद्विषयेचक्रवर्त्तीमुख्यःपरमेश्वरस्याग्रेस्वकांतां ३

पद्मावतींस्वयमेवनर्त्तयतीत्यभिप्रायः ।। अथवापद्मावत्याःलक्ष्म्याःचरणौतयोश्चारणा
स्तावकास्तेषांमध्येचक्रवर्त्तीमुख्यः । चारणाःस्तुतिशीलवानित्यमरः ।। तेषांचक्रंसमू
हस्तत्रवर्त्तितुंशीलमस्येतिणिनिः ।। शृंगारवर्णनस्यकरिष्यमाणत्वात्स्वयमेवशृंगा
रीतिसूचितं ।। यद्वाचरणयोश्चरतिपरिचरतीतिचरणचारणापद्मावतीचरणचारणा
यसेविकायस्यसतथासचासौचक्रवर्त्ती ।।२।। तथाभर्तृहरौवोद्धारोमत्सरग्रस्ताप्रभवः
र स्मयदूषिताः ।। अबोधोपहताश्चान्येजीर्णमंगेसुभाषितमिति ।। सुभाषितवर्त्मभिप्रे
त्याहयदिहरिस्मरणेति ।। भोजनजयदेवसरस्वतींतदाशृणु ।। जयदेवस्यसरस्वती
गीतरूपावाणीतां ।। कदायदितवमनः ।। स्मरसंभक्तिरसेनसहवर्त्ततइतिसरसं
कस्मिन्हरिस्मरणे ।। स्मर्तॄणांसकल्कपापानिहरतीतिहरिः ।। तस्यस्मरणमनुचिंतनं

गी॰गो॰ ४

तस्मिन्॥यदिचतेकुतूहलंकौतुकमस्ति॥कासुविलासकलासुविलासेरतिकालेक
लाः॥चतुष्षष्टिकामकलाः तासु॥किंभूतांसरस्वतीं॥मधुराणिसरसानिचतानिमंजु
लानिकोमलानिचकांतानिरमणीयानिचतानिपदानिचतेषामावलीराजिर्यस्यां
सातथातांमधुरमंजुलकांतपदावलीं॥३॥अधुनास्वीयंप्रबंधंश्लाघयति॥यंसूच
नाद्वाचःपल्लवेति॥७॥जयदेवस्यकवेःकोपिकविःस्पर्द्धीस्पर्द्धावान्समानोऽ
धिकोनविश्रुतः नख्यातः॥ननुउमापतिधरादयःकवयःस्पर्द्धिनःसंतीत्याहउ
मापतिधरःकविःवाचःपल्लवयतिकेवलं॥कोमलावचोवक्तीत्यर्थः ननुगिरांसं
दर्भशुद्धिंजानीते॥तथाशरणःकविःश्लाघ्यःप्रशस्यः॥कस्मिन्विषयेदुरूह
द्रुते॥केनाप्युपहितुमवगंतुंनशक्यतइतिदुरूहंतच्चतत्द्रुतंचतस्मिन्अतिशीघ्रं राम॰ ४

वक्तुंसमर्थइत्यर्थः॥तथाआचार्यगोवर्द्धनःश्लाघ्यः॥कैःशृंगारोत्तरसत्प्रमेयरचनैः॥संति
उत्कृष्टानिचतानिप्रमेयाणिपदार्थाश्चतेषांरचनानिशृंगारोत्तराणि॥शृंगारप्रधानानिच
तानिसत्प्रमेयरचनानिचतैः॥अथवाआचार्यगोवर्द्धनंस्पर्द्धितुंपराभवितुंशीलमस्ये
तिशीलानिःशृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धीकोपिनविश्रुतः॥तथाधोयी
नामाकविःक्ष्मापतिः॥कविराजः॥श्रुतिधरःश्रुत्वाश्रवणमात्रेणधरतीतिशीघ्रग्राही
त्यर्थः॥गिरांवाचांतुसंदर्भोरचनाविशेषः तस्यशुद्धिःलालित्यादिपरिपाटीत्तांजय
देवकविराजोजानीते॥अतःतस्यस्पर्द्धीनास्तीत्यर्थः॥४॥मालवरागेणगीयते॥प्र
लयपयोधरेति॥५॥हेकेशव धृतमीनशरीर॥प्रलयेमहाप्रलये॥पयोधिरर्णवः
तस्यजलंतस्मिन्॥वेदंधृतवानसिपरमेश्वरोदेवःसृष्टिकालेब्रह्मणमुत्पाद्यत

गी॰गो॰ स्मैवेदंप्रयच्छति॥योब्रह्माणंविदधाति।पूर्वंयोवैवेदांश्चप्रहिणोति।तस्मैइतिश्रुतेः॥किंभू
५ तंवेदं॥विहितवहित्रचरित्रंविहितंकृतंवहित्रस्यपोतस्यचरित्रमिवचरित्रंयेनसतथा
।तं।वहित्रंसागरतारकंभवति।वेदोपिनित्यनैमित्तिकव्रतप्रतिपादन।द्वारेणसंसारसा
गरतारकोभवतीत्यर्थः अतःकारणात्भोजगदीशजगतीष्टेनियमयतीतिजगदीश
स्तस्यसंबोधनंहेजगदीश॥वेदयतिउच्यतिव्यक्तः।सन्निति वेदः।अविद्यांतत्कार्यसंसा ५४
रंहरतीतिहरिस्तस्यसंबोधनंहेहरेत्वंजय॥स्वमाप्रयाशत्रुसंहरणस्वभक्तप्रतिपालन
द्वारेणचसर्वोत्कृष्टोभव॥क्षितिरतीत्यादि॥हेकेशवधृतकच्छपरूपतवपृष्ठेक्षितिस्ति
ष्ठति॥किंभूतेपृष्ठे॥अतिविपुलतरे॥अतिशयेनविपुलंविपुलतरंतस्मिन्॥पुनःकिं
भूतेपृष्ठे॥धरणिधरणकिणचक्रगरिष्ठे॥धरिण्याभूमेर्धरणंतेनकिणः अंत्रशो राम॰
५

णितग्रंथिः सएवचक्रंचक्राकारःतेनगरिष्ठंगुरुतरंतस्मिन्सर्वत्रधर्षणेनोपचितमां
सपिंडःकिणउच्यते।जयजगदीशहरे।इतिपदंसर्वत्रपूर्ववद्व्याख्येयं॥वसतीत्यादि॥
हेकेशवधृतशूकररूपधृतंशूकररूपंयेन।सतथा।तस्यसंबोधनंहेधृतशूकररू
प॥तवदशनशिखरे।दशनस्यदंतस्यशिखरमग्रभागः।तस्मिन्लग्नामध्येचनिम
ग्नासतीपृथ्वीवसतितिष्ठति।किंभूताधरणी।शशिनिनिमग्नाकलंककलेव।कलं
कस्यकलासैव।श॥तवकरेत्यादिहेकेशव।धृतनरहरिरूप।तवकरकमलवरे।क
रएवकमलवरं।कमलश्रेष्ठंतस्मिन्नखंतिष्ठति।किंभूतंनखं।अद्भुतंशृंगं।अद्भु
तंशृंगंअग्रभागोयस्य।तत्तथा।अदृष्टपूर्वमित्यर्थः।पुनःकिंभूतं।दलितहिरण्य
कशिपुतनुभृंगं।दलितोविदारितोहिरण्यकशिपोस्तनुरेवश्यामत्वाद्भृंगोयेनतत्

था॥४॥ छलयसीत्यादि॥ हे केशव धृतवामनरूप। धृतं वामनरूपं येन स तथा तस्य संबो
धनं हे धृतवामनरूप। लोकप्रसिद्धवामनाद्विशेषमाह। अद्भुतवामन अद्भुतवामनस्या
यमर्थः॥ आदितो वामनीभूतः पश्चादद्भुतवामनः। तथा चोक्तं हरिवंशे। पादयोः पतितेनो
तस्य संबोधनं। हे अद्भुतवामन। त्वं बलिं छलयसि केन विक्रमेण आक्रमेण। किंभू
तं। पदनखनीरजनितजनपावन। पदस्य नखानि तेषां नीरं गंगाजलं तेन कृत्वा जनि
तं कृतं जनानां पवित्रीभावो येन स तथा तस्य संबोधनं विलोक्ये विक्रमे रूपे ब्रह्म
येन लोकपर्यंतं पादो गतस्तो ब्रह्मणार्घीदतः। ततो गंगावतार इति पौराणिकी कथा।५।
क्षत्रियेत्यादि॥ हे केशव धृतभृगुपतिरूप। धृतं भृगुपतिरूपं परशुराम इति रू

पं येन स तथा। तस्य संबोधनं हे धृतभृगुपतिरूप। त्वं जगत् स्नपयसि। कस्मिन् प
यसि जले। किंभूते जले क्षत्रियरुधिरमये। क्षत्रियाणां रुधिरमेव स्वरूपं यस्य त
त्तथा। तस्मिन् कुरुक्षेत्रे इत्यर्थः स्नानफलमाह। किंभूतं तत्। अपगतपापं
अपगतं पापं पुनः किंभूतं शमितभवतापं शमितो विनाशितो भवस्य तापः संतापो य
स्य तत्तथा यस्य तत्तथा नदः॥६॥ वितरसीत्यादि हे केशव धृतरघुपतिरूप। त्वं रणे
संगरे। दिक्षु दिशासु। वितरसि ददासि। कं दशमुखमौलिबलिं। दशमुखस्य राव
णस्य मौलयो मूर्द्धानस्त एव बलिः बलिरूपः तं। किंभूतं। दिक्पतिकमनीयं॥
दिशां पतय इंद्रादयस्तेषां कमनीयोऽभिलाषगोचरस्तं। पुनः किंभूतं रमणीयं
शोभनं। विपूर्वस्तरतिर्दानेवर्त्तते। तथा चाभिधानकांडे। विश्राणनं वितरणं स्पर्श

नंप्रतिपादनमिति।बलिमिति।बलिः पूजोपहारः स्याद्बलिर्दैत्यो बलिः कर इति
गी॰गो॰ ७ रत्नकोशः ॥७॥ वहसीत्यादि॥ हे केशव। धृतहलधररूप। धृतं हलधररूपं। येन
सतथा तस्य। संबोधनं हे धृतहलधररूप। त्वं वपुषि शरीरे वसनं दुकूलं व
हसि किंभूते विशदे शुभ्रे। किंभूतं जलदाभं जलदो नीलमेघः स्तस्य आभेव आभा
दीप्तिर्यस्य तत्तथा पुनः। किंभूतं। हलहतिभीतिमिलितयमुनाभं हलेन हति
र्हननं तस्या भीतिः भयं। तया मिलिता समागता या सौ यमुना च तस्या आभेव आ
भा कांतिर्यस्य तत्तथा॥ तथा च हरिवंशे। यो बलरामो यमुनां गतस्तत्र गोपालैः
। सह कादंबरीपानं कृत्वा वान्मत्तो भूत्वा। यमुनां मामाह्वयत आह्वानानंतरं यमुना
नायाता। इति विचार्य अस्येदं वचनमत्तमिवाहास्ततो रामः कोपं कृत्वा। ह रामः ७

लेनोत्पाटयेतामिति छन्न। यमुना समीपमागता इति पौराणिकी कथा। अत्र यमु
नायाः कृष्णजलत्वान्नीलवसनेन साम्यं। निंदसीत्यादि। हे केशव धृतबुद्धशरीर॥
धृतं बुद्धशरीरं येन स तथा तस्य संबोधनं हे धृतबुद्धशरीर। त्वं श्रुतिजातं वेदजा
तं। अग्निष्टोमेन स्वर्गकामो यजेतेत्यादि वाक्यं निंदसि कस्य यज्ञविधेः। यज्ञा
नां विधिर्विधानं तस्य। किंभूतं दर्शितपशुघातं। दर्शितः विहितः पशुघातः पशु
मारणं येन तत्तथा हे सदयहृदय। दयया सह वर्तत इति सदयं हृदयं यस्य स तस्य
। संबोधनं हे सदयहृदय॥९॥ ललितरागेण गीयते हे केशव धृतकल्किशरीर। धृ
तं कल्किशरीरं येन। स तथा। तस्य संबोधनं हे धृतकल्किशरीर। त्वं किमप्यद्भु
तं यथा स्यात्। करवालं खड्गं कलयसि गृह्णासि। कस्मिन्निमित्ते म्लेच्छानां यवना

गी॰गो॰
८

नांनिवहो।निकरतस्यनिधनंपातनविलासस्तस्मिन्।किंभूतंकरालं।भयंकरं।किमि
वधूमकेतुमिव।अग्निमिव।अथवाउत्पातसूचकग्रहमिव।तथाचामरसिंहः अ
ग्न्युत्पातौधूमकेतुजीमूतौमेघपर्वतौइति॥१०॥श्रीजयदेवेत्यादि।हेलोकश्रीज
वक यदेवेरिदमुदितंगीतं।उदारंसुंदरं ।त्वंशृणुकिंभूतं।सुखदंश्रुतमात्रेण
।पुनःकिंभूतंशुभदं।कल्याणदं।पुनःकिंभूतं।भवसारंभवेसंसारेसारभूतं।भवः
संसारसंतापश्रेयःशंकरजन्मसु॥११॥ललितरागेण॥श॥वेदानुद्धरतेजगन्नि
वहतेभूगोलमुद्बिभ्रते दैत्यंदारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते।पौलस्त्यंज
यतेहलंकलयतेकारुण्यमातन्वते।म्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यं
नमः॥१॥श्रितिताललध्वादितालरूपं।श्रितकमलाकुचमंडल।धृतकुंडलए।क

राम॰
८

लितललितवनमाल।जयजयदेवहरे॥१॥ध्रुवपदं॥दिनमणिमंडलमंडन।भव
खंडनए।मुनिजनमानसहंस।।ज०॥२॥कालियविषधरगंजनजनरंजनए
।यदुकुलनलिनदिनेश।।ज०॥३॥मधुमुरनरकविनाशनगरुडासनए॥सुरकुल
केलिनिदान।ज०॥४॥अमलकमलदललोचन।भवमोचनए॥त्रिभुवनभवननि
दान।ज०॥५॥जनकसुताकृतभूषणजितदूषणए॥समरशमितदशकंठ।ज०
॥६॥अभिनवजलधरसुंदरधृतमंदरए।श्रीमुखचंद्रचकोर।ज०॥७॥तवचरणेप्र
णतावयमितिभावयए।कुरुकुशलंप्रणतेषु।ज०॥८॥श्रीजयदेवकवेरिदंकुरु
तेमुदं।मंगलमुज्ज्वलगीत।ज०॥९॥इतिश्रीहरिविजयमंगलाचारनामाद्वितीयःप्र
बंधः॥२॥गीतार्थश्लोकेन०॥वेदानित्यादि।हेदेवतुभ्यंनमः।नमस्कारोऽस्तु।किंभू

तायकृष्णायकृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः॥तयोरैक्यं परंब्रह्म कृष्ण इत्य
भिधीयते। तस्मै कृष्णायपरब्रह्मणेनमः॥पुनः किंभूताय। स्वमायावेषेणदशाकृति
कृते।पुनः किंभूतायउद्धरते।उद्धरतीत्युद्धरन्तस्मै का न्वेदान्।पुनः किंवहतेवह
तीतिवहन्तस्मै।कानिजगंतिलोकान्।पुनः किंउद्बिभ्रते।उद्बिभर्तीतिउद्बिभ्रत्।तं
स्मै।किंभूगोलंपृथ्वीं।पुनः किं।दारयतीति दारयन्।तस्मैदारयते।कं
दैत्यंहिरण्यकशिपुं।पुनः किं छलयते। छलयतीतिछलयन्तस्मैछलयते।कं
बलिं।पुनः किंकुर्वते।कुर्वतीतिकुर्वन्तस्मै।कुर्वते।कंक्षत्रक्षयंक्षत्रियनाशं।पु
नः किंजयते।जयतीतिजयन्तस्मै।कंपौलस्त्यंरावणं।पुनः किंकलयते।कल
यतीतिगृ ह्णातीतिकलयन्तस्मै।कंहलंपुनः किं।आतन्वते।आतनोतीतिवि

स्तारयतीति।आतन्वन्।तस्मै।किं।कारुण्यं।कृपालुत्वं।पुनः किं।मूर्छयते।मूर्छयतीतिमोहय
तीतिमूर्छयन्।तस्मैमूर्छयतेकान्।म्लेछान्।पापकारिणः॥१॥श्रितेत्या।हेदेव द्योतना दे
त्मकहेहरेत्वंजय।स्वशरणागतजनं।सकलोत्कृष्टतयावर्त्तस्वजयजयेतिद्विरु
क्तिरादरद्योतनाय।किंभूतश्रितकमलाकुचमंडल।श्रितंआश्रितंकमलाकुचमंड
लंयेन।सतथा।तस्यसंबोधनंपुनः।किंभूत।कलितललितवनमाल।कलितास्वीकृ
ता।ललिताशोभनावनमालायेनसतथातस्या।संबोधनं।१।दिनमणीत्यादि॥हे
देवहरेत्वंजयजयकिंभूतदिनमणिमंडलमंडन।दिनस्याह्नोमणिःसूर्यःतस्यमंड
लंमंडयतीतितथा।तस्यसंबोधनं।पुनः किंभूतभवखंडन।स्वसेवकानांभवंज
न्ममरणादिरूपंसंसारंखंडयतीति।तथातस्यसंबोधनं।पुनः किंभूतमुनिजनमा

गी·गो· नहंस।मुनयश्चतेजनाश्च।तेषांमानसानि।तत्रहंसःश्रेष्ठतयातद्वत्।तस्यसंबोधनं
१० ।शब्दछलमिदं।मानसान्निरस्तिहंसस्तरतीतिमानसहंसव्यपदेशः।४।कालियेत्या
दि।सर्वत्रजयदेवहरे इत्यस्यव्याख्यानंपूर्ववत्ज्ञातव्यं।किंभूतकालियविषधरगं
जन।कालियश्चासौविषधरोव्यालश्चतंगंजयतिदाम्यतीतित।।३।।मधुमुरेति।।
गरुड मधुमुरनरकसंज्ञानांविनाशन।गरुडासनएवआसनंयस्य।सुरकुलेति।सुर
कुलानांदेवसमूहानांकेलिःक्रीडायाःसुखस्येतियावत्।निदानआदिकारण
।अमल कमलेति।।५।।अमलकमलनिर्मलपद्मपत्रवत्लोचनेयस्यभ
वमोचनसंसारभंजक।।६।।त्रिभुवनेति।त्रिभुवनमेवभुवनंगृहंतत्रनिधानंनि राम० १०
धिरिव।।७।।जनकेति।जनकसुतायाः।सीतायाःकृतभूषणकृतालंकारजित

येनतत्संबुद्धौ
दूषण।जितंदूषणनामराक्षसोयेनसमरेतिसंग्रामे।शमितोदशकंठोरावणोयेन
।।६।।अभिनवेति।सजलमेघवत्सुंदर।धृतंमंदरंमंदराचलं।श्रीमुखंलक्ष्मीमुख
मेवचंद्रः।तत्रचकोरइव।।७।। तवचरणेतिएवंभूतेहरेतवचरणेवयंप्रणताः
य अतीवनम्राःभावंजानीहि।प्रणतेषुमादृशेषुकुशलंकल्याणंकरु।।८।।हे
देवहरे।जयजयेतिप्रार्थयते।श्रीजयदेवकवेःइदंउदितंगीतंमंगलं।गीतंवि
शेषः।मुदंहर्षंकुरु अएवतां।कुरुतात्।भक्तानामितिशेषः।कथंभूतंइदं
मंगलं।उज्वलगीतं।नानानुगमेनरम्यंगीतंगानंयस्मिन्।।९।।अधुनाकविः
कामोद्दीपकत्वात्।।वसंतस्यवर्णनव्याजेनकृष्णक्रीडावर्णनंप्रतिआशि
षंब्रूते।। ।।वसंतरागेणगीयते।।पद्मापयोधरतटीपरिरंभलग्न।।काश्मीरमुद्रि

धु
गी॰गो नमुरोमः सूदनस्य॥व्यक्तानुरागमिवखेलदनंगखेद।स्वेदांबुपूरमनुपूरयतुप्रि
११ यंवः॥१॥वसंतेवासंतीकुसुमसुकुमारैरवयवै।र्भ्रमंतीकांतारेबहुविहितकृष्णा
नुशरणां॥अमंदंकंदर्पज्वरजनितचिंताकुलतया।बलद्बाधांराधांसरसमिदमू
चेसहचरी॥२॥रूपा तालेङुनदूयंविरामांतंलघुश्चैकः॥ललितलवंगलतापरि
शीलन।कोमलमलयसमीरे॥मधुकरनिकरकरंबितकोकिल कूजितकुंजकु
टीरे॥१॥विहरतिहरिरिहसरसवसंते॥नृत्यतियुवतिजनेनसमंसखिविरहि
जनस्यदुरंते॥२॥ध्रुवपदं उन्मदमदननमनोरथ॥पथिकवधूजनजनितविलापे॥
अलिकुलसंकुलकुसुमसमूह।निराकुलबकुलकलापे।३॥मृगमदसौरभरभ राम॰
सवशंवदनवदलमालतमाले॥युवजनहृदयविदारणमनसिज नखरुचि ११

किंशुकजाले॥४॥मदनमहीपतिकनकदंडरुचि॥केसरकुसुमविकासे॥मिलितशि
लीमुखपाटलपटलकृतस्मरतूणविलासे॥५॥विगलितलज्जितजगदवलोकन।
तरुणकरुणकृतहासे॥विरहिनिकृंतनकुंतमुखाकृति केतकिदंतुरिताशे॥६॥
॥माधविकापरिमलललिते॥नवमालतिजातिसुगंधौ॥मुनिमनसामपिमोहनका
रिणि तरुणाकारणबंधौ॥७॥स्फुरदतिमुक्तलतापरिरंभण॥मुकुलितपुलकितचू
ते॥वृंदावनविपिनेपरिसरपरिगतयमुनाजलपूते॥श्रीजयदेवभणितमितमुदय
ति हरिचरणस्मृतिसारं॥सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥८॥
इतिश्रीमाधवोत्सवकमलाकारनामातृतीयःप्रबंधः॥३॥ ॥अधुनाकविःका
मोद्दीपकत्वा॥द॥वसंतस्यवर्णनव्याजेनकल्लकीडावकृंनकाव्यप्रतिआशिषंब्रुते

॥पद्येति॥ मधुसूदनस्यउरोवक्षस्थलंवः। युष्माकंप्रियंमभीष्टं। अनुपूरयतुसंपूर्णंकरोतु कथंभूतंमधुसूदनस्यउरः। पद्मायाः लक्ष्म्याः पयोधरतटीस्तनपरिसरः तस्यपरिरंभणेनआलिंगनेनलग्नंयत्काश्मीरंकुंकुमंकेसरंतेनमुद्रितंचिन्हितंममैवेदंवक्षस्थलंनान्यस्य इतिभावः। पुनःकथंभूतमिवव्यक्तानुराग। प्रकटानुरागमिव। पुनः कथंभूतमुरः खेलेतिखेलगतिंकुर्वन्यअनंगःकंदर्प स्तस्यखेदेनसुरतायासेन स्वेदांबुपूरोघर्मजलप्रवाहोयत्र। अधुनाविरहोत्कंठितायाः। काचित्सखीकृष्णवार्तांवक्तुं आह।१। वसंतेति। वसंतकाले। काचित्सहचरीसखीसविलासं। वक्ष्यमाणंराधांप्रत्यूचे। अवदत्। कथंभूतांराधां वासंतीं कुसुमसुकुमारैर्माधवीपुष्पसुकोमलै स्वयवैरंगैरुपलक्षणं। उपलक्षणेतृतीया। कथंभूतांराधां। कांतारेदुर्गमेवनानिभ्रमंतीं पुनः

असु

चिंतातया

कथंभूतां बहुविह्वितंवारंवारंदूतीद्वारेणकृतं कृष्णानुसंधानंयया पुनःकथंभूतांराधां अमंदं उत्कटं यथास्यात्तथा। कंदर्पज्वरेणजनितायाउत्पादितायाआकुलतातया कृत्वा बलंतीउत्गच्छंतीवाधापीडायस्याः पूर्वोक्तमर्थंगीतेनाह॥ वसंतरागरूपकताले॥ तत्ररागवसंतस्यलक्षणं॥ शिखंडिवर्हौचयवद्धचूडः पुष्णंपिकंचूतलताकरेण

म५ भ्रमन्मुदावासमनंगमूर्तिर्मतोनंगस्यवसंतरागः॥ ललितेति॥ हेसखिइहसरसवसंतेविहरतियुवतिजनेनसमंनृत्यतिचेतिध्रुवपदगतेनान्वयः हेराधेहरिःकृष्णः इहअस्मिन्मनोहरवसंतसमयेक्रीडति। कामिनीसमूहेनसहनृत्यंकरोतिच कुत्रस्थलेइत्यपेक्षायां। सप्तम पद्यंस्थितेनवृंदावनविपिनेनान्वयः। कीदृशेवसंतसमये। ललितेत्यादीनिसप्तपदानिवसंतसमयविशेष

न

णानि। ललितायाः। मनोहरायाः। लवंगलतिकायाः लवंगशाखायाः। परिशील
नेन संपर्केण। कोमलो गंधः मलयसमीरो। मलयानिलो। यत्र। अनेन वायोः
सुगंधत्व। शीतलत्वान्युक्तानि॥ मधुकरेति॥ मधुकरनिकरो भ्रमरसमूहे। नं ण॰
करंवितैर्मिश्रितैः कोकिलैः। कूजितैः शब्दितः। कुंजएव। लता गृहमेव। कुटीरो
ल्पाकुटी यत्र॥२॥ उन्मदेति॥ उद्गतो मद मदनो हर्षकामो यत्र एवंभूतो मनोरथो
यस्य। एवंभूतो यः पथिकजनः पांथस्त्रीजनस्तेनजनितो। उत्पादितो
यो विलापः परवेदनं यत्र॥ अलिकुलेति॥ अलिकुलैः भ्रमरसमूहैः संकुलो व्या
प्तं। कुसुमसमूहस्तेन॥ निराकुलो व्यग्रः। कुलानां। वृक्षाणां कलापः समूहो
यत्र॥२॥ मृगमदेति॥३॥ मृगमदस्य कस्तूरिकाया सौरभरभसवशंवदी। सुरभि

व

नोत्सही स्यात्र कलावादीनीनवानूतनादलमालापत्रमालाएषां ईदृशास्तमालायत्रा नू
तनंपत्रस्तमालो मृगमदगंधमनुकरोतीति। युवजनानां। तरुणजनानां हृदयं। वि
दारयति। एवंविधोयो मनसिजः कंदर्पस्तस्य या निनखानितद्वत्। रुचिदीप्तिर्येषां।
एवंभूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र॥३॥ मदनमहीपतेति॥ ज्ञा
मदनमहीपतेः कामनृपस्य कनकदंडछत्रं। तद्वद्रुचिर्दीप्तिर्यस्य। एवंभूतः केसरकु
सुमविकासः। नागकेसरपुष्पप्राचुर्यं यत्र। मिलितेति॥ मिलिताः शिलीमुखाः भ्र
मरा येषु तैः। पाटलिपटलैः। पाटलपुष्पसमूहैः वृतः स्मरतूणविलासः कामतूणी
रचेष्टितं यस्मिन्॥४॥ विगलितेति॥५॥ विगलितस्य शिथिलावयवस्य। अतएव ल
ज्जितस्य जगतः। अवलोकनेन तरुणकरुण। कलैः पुष्पविकासव्याजेन कृतो

गी·गो·
१४

हासोद्दास्यंयत्र।विरहीति।विरहिनिकृंतनानिवियोगिमारणानिकुंतमुखाकृतीनिभल्ल
मुखाकाराणि।यानिकेतकीपुष्पाणितैःदंतुरिताःव्याप्ताःआशादिशोयस्मिन्॥५॥
माधविकेति॥६॥माधविकायाः।वासंतीलतायाः परिमलेनगंधेनललितेमनोह
रे।नवमालिकानेवारपुष्पाणि।जातिः।जातीपुष्पाणि।ताभ्यांसुगंधौ।मुनिमनसा
मपि।ऋषिचित्तानामपि।मोहनकारिणी।मदनजनके।तरुणानां।यूनांआकारण
बंधौ।सहजमित्रे।वृंदावनविपिनेहरिःक्रीडतीत्यन्वयः॥६॥स्फुरदतीति॥७॥स्फु
रंत्याश्चलंत्याअतिमुक्तलतायाः वासंतीलतायाःपरिरंभणेन।आलिंगनेनमुकु
लितःपुष्पितः।पुलकितोहृष्टः।आम्रवृक्षोयत्र।कथंभूतेवृंदावनविपिने।परिसर राम·
परिगत।यमुनाजलपूतेपरिसरेपर्यंतभुवि।परिगतंव्याप्तंयत्।यमुनाजलं।तेनपू १४

तेपविते।७।श्रीजयदेवेति॥८॥श्रीजयदेवकवेरिदंभणितंउदयति।उदयंप्राप्नोतिप्राप्नो
तुइत्यर्थः।हरिचरणस्मृतिरनुचिंतनंसारोयत्र।सरसंसुमनोहरंवसंतसमयवर्णनं वन
यत्र। ... ।अनुगतंअनुकृतमदनविकारः।कामविलासोयस्मिन्।वियोगीनांदुः
सहंवसंतवासंवर्णयंति॥८॥गुर्ज्जरीरागेणगीयते॥दरविदलितमल्लीवल्लिचंचत्परा
ग।प्रकटितपटवासैर्वासयन्काननानि।इहहिदहतिचेतः।केतकीगंधबंधुः।प्रस
रदसमबाणप्राणमद्गंधवाहः॥१॥अद्यो्त्संगवसद्भुजंगकवलक्लेशादिवेशाचलं।प्रा
लेयप्लवनेछयानुसरतिश्रीखंडशैलानिलः।किंचित्स्निग्धरसालमौलिमुकुला
न्यालोक्यहर्षोदया।दुन्मीलंतिकुहूःकुहूरितिकलोत्तालाःपिकानांगिरः॥२॥उन्मील
न्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलरवैरुद्गीर्णकर्णज्व

गी॰गो॰ राः।नीयंतेपथिकैः कथंकथमपिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासै
१५ रमीवासराः॥३॥अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं मुरा
रिमाराडुपदर्शयंत्यसौ।सखीसमक्षंपुनराहराधिकां॥४॥ जंपाताले द्रुतद्वंद्वविरामां
तंलघुश्चैकः रूपं।चंदनचर्चितनीलकलेवर।पीतवसनवनमाली।केलिचलन्म
णिकुंडलमंडित।गंडयुगस्मितशाली॥१॥हरिरिह मुग्धवधूनिकरे विलासिनि विल
सति केलिपरे॥२॥ध्रु॰॥पीनपयोधरभारभरेण।हरिंपरिरभ्यसरागं।गोपवधूर
नुगायति काचिदुदंचितपंचमरागं॥३॥कापिवि लासविलोलविलोचन।खेलनज
नितमनोजं।ध्यायतिमुग्धवधूरधिकं मधुसूदनवदनसरोजं॥४॥कापिकपोलत
ले मिलितोंबवती दयितंपुलकैरनुकूले॥५॥केलिकलाकुतुकेनचकाचिदमुं ज राम॰
लपितुं कृमतिस्फुतिमूले॥चारुचुचुंबनितं १५

मुनाजलकूले।मंजुलवंजुलकुंजगतं विचकर्षकरेणदुकूले॥६॥करतलतालतरलव
लयावलिकलितकलस्वनवंशे।रासरसेसहनृत्यपराहरिणायुवतिः प्रशशंसे॥७
।श्लिष्यतिकामपिचुंबतिकामपिरमयतिकामपिरामां।पश्यतिसस्मितचारुतरा
मपरामनुगच्छतिवामां॥८॥श्रीजयदेवकवेरिदमद्भुत।केशवकेलिरहस्यं॥वृंदावन
विपिनेचरितं वितनोतुशुभानियशस्यं॥९॥विश्वेषामनुरंजनेनजनयन्नानंदमिं
दीवर॥श्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं स्वच्छंदंव्रजसुंदरीभिरभितः
प्रत्यंगमालिंगितः।शृंगारः सखिमूर्तिमानिवमधौमुग्धोहरिः क्रीडति॥१॥रासोल्ला
सभरेणविभ्रमभृतामाभीरवामभ्रुवा।मभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया
साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहा

रीहरिःपातुवः॥१॥इतिश्रीसामोददामोदरभ्रमरपदनामाचतुर्थप्रबंधः॥ ४॥
॥ ॥ इतिश्रीगीतगोविंदेसामोददामोदरोनामप्रथमसर्गः॥१॥ ॥ ॥
दरविदलितइति॥७॥ इहवसंतेगंधवाहोवायुः।विरहीणांवियोगिनांचेतःदहतीत्य
न्वयः।अर्थात्।किंकुर्वन्।दरविदलितायाः।ईषद्विकसितायामल्याः।मल्लिका
हु याः।वल्लिंपुष्पलतासुचंवद्भिरुच्छलद्भिपरागैःपुष्परजोभिः।प्रकटितपटवासैः
स्फुटीकृतपटवासचूर्णैः।काननानिवासयन्सुरभीकुर्वन्॥पुनः।कथंभूतः के
तकीपुष्पाणांगंधस्यबंधुर्मित्रं।वसंतवासराणामनंगोद्दीपकत्वंआह॥७॥उन्मी
लंनीति॥२॥ अमीवसंतसंबंधिनोवासराः॥दिवसाः॥ पथिकैर्मार्गस्थैर्विरहिभिः
कथंकथमपिकेनापिदुःखेननीयंतेउल्लंघ्यंते।कथंभूताः।वासराः।उन्मीलंश्चा

सौमधुगंधश्चपुष्परसगंधस्तत्रलुब्धायेभ्रमराःस्तैःव्याधूताःकंपिताःयेचूतांकुरा
आम्रांकुरास्तेषुक्रीडतांकोकिलानांकाकलीकलकलैःसूक्ष्माव्यक्तमधुरध्वनिको
लाहलैः।कष्टजनकत्वेनउद्गीर्णःप्रकाशितःकर्णज्वरःश्रवणोपतापोयेषुकथं
नीयंतेआह।ध्यानेचिंतने।अवधानंचित्तैकाग्र्यंतेनक्षणंअल्पकालं।प्राप्तायाः।अ
नुभूतायाःप्राणसमायाःनायिकायाःसमागमरसेन।संबंधस्वरूपरसेनउल्ला
सोहर्षोयेषांते॥२॥अनेकनारीति॥३॥असौराधिकांपुनराह॥इत्यन्वयः॥
कथंभूतासखी।आराद्दूरेवर्त्तमानंसमक्षंयथास्यात्तथाँहृत्वंउपदर्शयंती॥की मुरारिं
दृशंहरिं।अनेकनारीपरिरंभसंभ्रमेणालिंगनादरेणस्फुरतइतस्ततोगच्छन्।म
नोहारीमनोज्ञोयोविलासःक्रीडातत्रलालसःआदरवान्।पश्चात्कर्मधारयः।

गी॰गो॰ १७

अमुमेवश्लोकोक्तमर्थंगीतेनाह॥३॥चंदनेति॥हरिरिहमुग्धवधूनिकरे॥इति
ध्रुवपदं॥रामकरीरागेःरागलक्ष॥स्वर्णप्रभाभास्वरभूषणांचनीलंनीचोलंसुतनौ
वहंती।कांतोपदेकांतमधिश्रितोपिमानोन्नतारामकरीप्रदिष्टा॥चंदनेनमलयजे
नचर्चितरेखाकारेणानुलिप्तंनीलंकलेवरंशरीरं।यस्यपीतंसुवर्णवर्णंवसनंय
स्यवनमालायस्यास्तीतिततःप्रत्येकंकर्मधारयःपुनःकथंभूतःकेलिनाक्रीडया उ
चलंतीयेमणिकुंडलेमणियुक्तेकुंडले।ताभ्यांमंडितंशोभितंगंडयुग्मंयस्यस्मितेनइ
षद्धास्येनशालतेशोभतेततःकर्मधारयः॥१॥पीनेति॥२॥हेराधेकाचिद्गोपवधूर्गोपां
गना।पीनपयोधरभारभरेणपुलकुचगौरवातिशयेन॥सप्रेमंयथास्यात्तथाहरिंपरिर रा॰
भ्यआलिंग्यपश्चात्‌उत्तरुई क्षतंपंचमरागंगायति।गानंकरोतिकापिविलासेति॥२॥ १७

वि

कापिचित्मुग्धवधूमनोहरगोपांगना॥अधिकं तिशयेनमधूसूदनवदनसरोजं।कलमुखां
बुजंध्यायतिचिंतयति।विलासेनविलोलयोर्नेत्रयोःखेलनेनसंचरणेनःजनितोउत्पादि
तःकामोयेन॥३॥कापिनितंववतीगोपांगनादयितंकलंकपा लतलेगंडदेशेचारुमनो
चुंबति ज्ञंयथास्यात्तथाचुचुंबवती।कथं।भूताकिमपिकार्यंलपितुंवक्तुंश्रुतिमूलेकर्णप्र
देशेमिलितासंलग्ना।कीदृशेकपोलतले।पुलकैरोमोद्गमैरनुकूले।प्रेमप्रियेनके
केलिकलाकुतुके नेति॥४॥काचिद्गोपीकेलिकलाकुकेनहेतुनाश्रृंगाररसक्री अ
डातात्पर्येणहेतुनाकरेणहस्तेनअमुंकल्लंदुकूलेवस्त्रेविचिकर्षआकृष्टवती॥क
थंभूतंअमुंयमुनाजलकूलेयमुनाजलोपलक्षितेकूलेतीरेमंजुलोमनोहरोयो
वंजुलकुंजोवेतसलता गृहंतत्रगतंवर्तमानं॥४॥करतलेति॥५॥काचिद्युवति

गी॰गो॰ १८

गोपांगनाहरिणाहल्लेनप्रशंसेस्फुता॥रासरसेगोपक्रीडानुरागेसहनृत्यपराह्ल
लसमंकालंनृत्यंती।कथंभूतेरासरसेकरतलयोःहस्तयोःतालेनचपेटेन
ध्वनिजातरलयाचंचलयावलयावल्याकंकणपंक्त्याकलितःमिश्रितःकलस्व
नवंशोऽव्यक्तमधुरशब्दसहितोवंशोवेणुर्यत्र॥६॥श्लिष्यति।७॥हेराधेश्रीकृ गी
ष्णःकामपिगोपिकांश्लिष्यतिआलिंगतितथाकामपिचुंबतितथाकामपिरामां
रमयतिक्रीडयति।अपरांनायिकांसस्मितचारुहासमनोहरंयथास्यात्तथापश्य नरां
ति।अपरांवामांसुंदरीमनुगच्छतिइत्यर्थः॥७॥श्रीजयदेवेति।८॥श्रीजयदेवक
वेरिदंगीतंशुभानिकल्याणानिवितनोतुकरोतु।अर्थात्भक्तानांकीदृशं।गीतंअ
द्भुतं।आश्चर्यकरंकेशवस्यकृष्णस्यकेलिरहस्यं।क्रीडाहर्षोयत्र।अद्भुतंयुक्ता रामं॰ १८

त्सर्वासांप्रीत्युत्पादनात्।वृंदावनविपिने।वृंदावननाम्निवने।वलितंनानारसान्वितं।इ
त्यर्थः॥यशस्यंयशसहितंयशस्करमित्यर्थः॥८॥विश्वेषामिति।१॥मुग्धोहरिः
क्रीडतीत्यन्वयः हेसखि हेराधेमधौवसंते।मुग्धोमनोहरोहरिःक्रीडतीत्यन्व
यःकइवमूर्तिमान्शृंगारःशरीरधारीव।किंकुर्वन्।अनुरंजनेनानुरागेण।वि
श्वेषांभक्तानांआनंदंजनयन्नुत्पादयन्।पुनःकिंकुर्वन् इंदीवरश्रेणी कमलमा णां
लातद्वत्।श्यामलकोमलैःकांतमनोहरैरंगैःअनंगोत्सवंकामहर्षं।उपनयन्
।उत्पादयन्।पुनःकथंभूतःस्वच्छंदंस्वेच्छयाव्रजसुंदरीभिःगोपांगनाभिःअभितःस
र्वतोभावेन।प्रत्यंगावयवेनआलिंगितःगोपीभिरेकदालिंगनेन।यथायदंगंप्राप्तं
यातदेवालिंगितमितिभावः।श्यामोभवतिशृंगारःसितोहासःप्रकीर्तितः।इतः

श्रीरंगु

गी·गो· शृंगारविशेषणानिष्प्याप्रानि पदानिमलयानिलस्यदुसहत्वेकारणमाह॥१॥ अ
१७ द्यत्संगति। हेराधे अद्येदानींदसंतसमये शैलानिलः मलयजपवनः उत्संगे क्रो
डेवसंतोभुजंगाः सर्पाः तेषांकवलनेशान्तापादिवइशाचलंहिमाचलं। प्रालेयप्लव
नेछयातुहिममज्जनेछयानुसरति। अनुगच्छति। किंच। पक्षांतरेपिकानांगिरोवा
त्पः स्निग्धरसालमौलिमुकुलानिकोमलचूतस्तबकंकुशलानि। आलोक्यदृष्ट्वा
हर्षोदयादानंदोदयात्। उन्मीलंती। उद्गच्छंति। कथंभूतागिरः कुहूः कुहूः। इतिक
लोत्तालाः इत्याकारेण अव्यक्तमधुरशब्देन। उत्तालाप्रगटाः। कविः कथोपक्रमंत्व
त्कालोकानाशिषयति॥ रासोल्लासेति॥ हरिः क्षलः वः युष्मान्पातु इत्यन्वयः क
थंभूतोहरिः रासोल्लासभरेणगोपक्रीडायां हर्षातिशयेनविभ्रमभृतां। शृंगारवि राम·
१७

लासधारिणीनां। आभीरवामभ्रुवांगोपांगनानां अभ्यर्णे समीपं निर्भरंगाढं यथास्या
त्तथाउरः वक्षस्थलंपरिरभ्य आलिंग्यराधया। उद्गूढं यथास्यात्तथागीतस्तुतिव्याजा
त्गानप्रसंसाछलेनचुंबितः किंकृत्वा। त्वद्वदनंत्वन्मुखं सुधामयममृतमयं साधु
शोभनं। इतिव्याहृत्यउक्त्वा कथंभूतोहरिः स्मितमनोहारीराधायाः चुंबनंदृष्ट्वा स्मिते
नईषद्धास्येनमनोहर्त्तुंशीलंयस्यसः॥ इतिश्रीगीतगोविंदे जयदेवविरचिते सामो
ददामोदरोनाम प्रथमः सर्गः॥१॥ धन्याशीरागेणगीयते॥ भुवनेशीपदकमलं प्र
णम्यकुंभोनृपतिविमलं जयदेवरचितमात्तं। युनक्तिगुकेनधातुनागातुं॥१॥ विह
रतिवनेराधासाधारणप्रणये हरौ॥ विगलितनिजोत्कर्षावशेनगतान्यतः। क्वचिदपि
लताकुंजेगुंजन्मधुव्रतमंडली। मुखरशिखरेलीनादीनाप्युवाच रहः सखीं॥२॥

त्रण

गी·गो २० वर्णधनिनाले॥ संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं॥ चलितदृगंचलचंचल
मौलिकपोलविलोलवतंसं॥१॥रासेहरिमिहविहितविलासंस्मरतिमनोममकृतपरि
हासं॥ध्रुवपदं॥ चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥प्रचुरपुरंदरधनु
धकजीवमधुराधरपल्लवमुल्लसितस्मितशोभं॥३॥ विपुलपुलकभुजपल्लववलयित
वल्लवयुवतिसहस्रं॥करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रं॥४॥ज
लदपटलचलदिंदुविनिंदकचंदनतिलकललाटं॥पीनपयोधरपरिसरमर्दननिर्दयहृ
दयकपाटं॥५॥ मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं॥पीतवसन मनु
मुनि गतमनुजसुरासुरवरपरिवारं॥६॥ विशदकदंबतलेमिलितंकलिकलुषभयंशम राम० २०

यंतं मामपितरलतरंगदनंगदृशामनसारमयंतं॥७॥श्रीजयदेवभणितमतिसुंद
रमोहनमधुरिपुरूपं॥हरिचरणस्मरणंप्रतिसंप्रतिपुण्यवतामनुरूपं॥८॥इतिश्री
मधुकरिपुरत्नकंठिकानामापंचमःप्रबंधः॥५॥विहरतिवनेति॥१॥राधारहएकांते॥स
खीउवाच॥कथंभूताराधा॥वनेवृंदावनेहरौकुलेविरतिक्रीडति सतिविगलितनि ह
जोत्कर्षात्गतनिजभाग्यात्॥ईर्षावशेनअसहि तया॥अतोन्योस्मिन्स्थलेगता॥ ष्णु
कथंभूतेहरौ॥साधारणप्रणये॥अन्यगोपीतुल्यप्रेम्णि॥अतएवकाचिदपिलता
कुंजेलतागृहेलीनागुप्ता॥कथंभूतेकुंजे॥गुंजतांगंभीरंशब्दंकुर्वतांमधुव्रतानांभ्र
मराणांमंडल्यांसमूहेमुखरशिखरेशब्दायमानाग्रभागेअतएवदीनापिदुःखि
तापि॥१॥श्लोकोक्तमर्थंगीतेनाह॥रागगुर्जरीरूपकतालसंचरेति॥२॥रासेति॥

गी॰गो॰ स्मरनीतिध्रुवपदं॥हेसखिममम्मनःहरिंकलंस्मरति।कथंभूतंहरिं।संचरताउद्गछता।अ
२१ धरसुधयामधुरेण।अधरामृतमनोहरेणध्वनिना।शब्देनमुखरितशब्दितोमोहननां
मावंशोयेनपुनःकीदृशंचलितेतिचलितः।आवर्जितःदृगंचलः।कटाक्षोयस्यचंच
लःमौलिःशेखरंयस्यकपोलेगंडस्थलेविलोलःचंचलःअवतंसः।कर्णाभरणं
यस्यसःतंततनःप्रत्येकंकर्मधारयः।पुनःकीदृशंहरिं।इहरासेगोपक्रीडायांवि
हितविलासंकृतक्रीडंपुनःकीदृशंकृतपरिहासंविहितविभ्रमविलासं॥१॥
चा चंद्रकेति॥२॥चंद्रिकेणविचित्रवर्णचिन्हेनरूपं शोभमानानांमयूरशिखंडिका
नांमयूरपिछानांमंडलेनसमूहेनवलयितःवेष्टिताः।वलयाकारेणवेष्टिताके
शायस्यअतएवप्रचुरेणविस्तीर्णेनपुरंदरधनुषाइंद्रधनुषाअनुरंजिताश्चित्रि राम॰
२१

तामेदुरोनिबिडःस्निग्धःसुदिरःमेघःतद्वत्सुवेशंसुंदरं॥२॥गोपकदंबेति॥३॥गो
पकदंबस्यगोपसमूहस्यनितंबवतीनांस्त्रीणां मुखचुंबनेनलंभितःप्रापि
तःलोभोयेनपुनःकीदृशंवंधुजीवमिवबंधुपुष्पमिवमधुरवल्लभोअधरपल्लवो
मधुरंधरपल्लवं यस्यबंधुजीवंतुपरिभाषायांउल्लसितेनप्रकटितेनस्मितेनशोभायस्यतं॥४॥वि
पुलेति॥५॥विपुलाःवहुलाःपुलकारोमोद्गमास्ताभ्यांभुजपल्लवाभ्यांवलयितं
वेष्टितंवल्लवानांआभीराणांयुवतिसहस्रंगोपिकावृंदंयेनपुनःकीदृशंकरौच
७ चरणौचरश्चएतेषांसमाहारः।करचरणोरस्तस्मिन्वर्तमानानांमणिगणयुक्त
भूषणानांकिरणेनदीप्त्याविभिन्नंविदारितंतमिस्रंअंधकारंयेन॥५॥जलदेति॥
६॥पुनःकीदृशंहरिंजलदपटलेमेघसमूहेचलतः।इंदोश्चंद्रस्यविनिंदकंसमानं

गी॰गो॰ चंदनतिलकं चंदनाकृतितिलकं यत्र तादृशं ललाटं यस्य अभूतोपमेयं। पुनः कीदृ
२२ शं पीनानां मांसलानां पयोधराणां स्तनानां परिसरस्य पर्यंतदेशस्य मर्दने निर्दयं।
दयारहितं हृदयकपाटं यस्य॥६॥ मणिमयेति।७॥ मणिमयेन मणिरूपेण मनोहरा मकरेण
भ्यां कुंडलाभ्यां मंडितो लंकृतः गंडो गंडस्थलं यस्य। पुनः कीदृशं महांतं। उदारं अ
भीष्टदातारं वा पुनः कीदृशं पीतवसनं पीतांबरं। अनुगताः आश्रिताः मुनयो यत
यः मनुजाः लोकाः सुरा लोका असुरास्ते परिचराः परिजना यस्य॥७॥ विशदेति॥
॥८॥ पुनः कीदृशं मामपि किमपि। अनिर्वचनीयं यथा स्यात्तथा तरंगन् उद्गच्छन्।
अनंगो यस्यां। तादृशा दृष्ट्या मनसा हृदयेन रमयंतं।७॥ श्रीजयदेवेति।।८॥ श्री राम॰
जयदेवभणितं गीतं भक्तानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं भवतु इत्यर्थः २२
ष्णं

मोहनं
रः कथंभूतं। अतिसुंदरं मोहाकारं मधु रिपुरूपं कृत्स्नरूपं यस्मिन्। इदानीं रा
धा याश्री कृष्णे वसतश्चेतसो अवस्थां आह॥८॥ इति श्रीमत्कुंभकर्ण्णकृतौ कांता
मापंचमः प्रबंधः॥५॥ भैरवरागेणगीयते॥ गणयति गुणग्रामं भ्रामं भ्रमादपि नेह
ते। वहति च परीतोषं दोषं विमुंचति दूरतः। युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां वि
ना पुनरपि मनो वामं कामं करोति करोमि किं॥१॥ वर्णयति ताले। निभृतनिकुंज
गृहं गतया निशि। रहसि निलीय वसंतं। चकितविलोकितसकलदिशा रतिरभ
सरसेन हसंतं॥१॥ सखि हे केशिमथनमुदारं। रमय मया सह मदनमनोरथभा
वितया सविकारं॥२॥ ध्रुवपदं॥ प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं॥३॥ किशलयशयननिवेशि

गी·गो· तयाचिर मुरसिममैवशयानं॥कृतपरिरंभणचुंबनयापरिरभ्यकृताधरपानं॥४॥अल
२२ सनिमीलितलोचनया॥पुलकावलिललितकपोलं॥श्रमजलसिक्तकलेवरया॥वरमद
नमदादतिलोलं॥५॥कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं॥श्लथकु
सुमाकुलकुंतलयानखलिखितघनस्तनभारं॥६॥चरणरणितमणिनूपुरया परि
रव पूरितसुरतवितानं॥मुखरविशृंखलमेखलया सकचग्रहचुंबनदानं॥७॥रतिसुखस
मयरसालसया दरमुकुलितनयनसरोजं॥निःसहनिपतिततनुलतया मधुसू
दनमुदितमनोजं॥८॥श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं सुख
मुत्कंठितगोपवधूकथितं वितनोतु सलीलं॥९॥हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लि राम·
मद्बल्लवीःवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थली॥मामुद्वीक्ष्यविलज्जितस्मि २२

तसुधामुग्धाननं कानने।गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च॥१॥दुरालोक
स्तोकस्तबकनवकाशोकलतिका।विकाशः कासारोपवनपवनोपि व्यथयति।अपि
भ्राम्यद्भृंगीरणितरमणीयानमुकुल।प्रसूतिश्चूतानां सखि शिखरिणीयं सुखय
ति॥२॥साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासिता।भ्रूवल्लीकमलीकदर्शि
तभुजामूलोर्द्धदृस्तस्तनं॥गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मु
ग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥३॥इतिश्रीगीतगोविंदे अक्लेशकेशवो नाम
द्वितीयः सर्गः॥२॥इतिश्री अक्लेशकेशवकुंजरतिलकनामाष्टप्रबंधः॥गणयतीति।हे
सखि मम मनश्चित्तं पुनरपि अधुनाकृले काममभिलाषं करोति।किं करोमि।निवृत्तौउ
पायांतरं नास्तीत्यर्थः।युवतिषु गोपीषु चलत् [illegible] जाताभिलाषे ।पुनः कीदृशे मां

छौ

विनाविहारिणी क्रीडाशीलेकीदृशंमनः।कामंअवश्यमित्यर्थः।वामत्वेकारणमाह।मम
मनसापराधस्यापिकृतस्यगुणग्रामंगुणसमूहंगणयति॥अमादपिआमंविस्मरणं
नेहतेनचेष्टते।भाममपीतिपाठे॥भामंक्रोधंनेहतेनवांछतितद्गुणाकर्षणेनपरि
तोषंवहतिदोषंमदीयावज्ञादिकंदूरतोमुंचतिपरित्यजतिपुनरपिराधागीतेनस
खीमाह॥मालवरागेएकतालीताले॥निभृतेति॥१॥सखिहेकेशीति॥ध्रुवपदं॥
हेसखित्वंकेशीमथनंमयासहरमयक्रीडांकारय।कीदृशंउदारंमहांतं।कथंभू
त यामयामदनमनोरथइच्छाभावितयासाभिप्रायया।प्राप्तया।कथंभूतंहरिं।सवि
कारंभावसहितं।कीदृश्यामया।निभृतं यन्निकुंजगृहंलतागृहंगतया
प्रापितयाप्रपन्नयाकथंभूतंकृष्णंनिशिरात्रौरहसिएकांतस्थलेनिलीय ति राम·
२८

रोहितीभूयवसंतंतिष्ठंतंपुनःकथंभूतयामया।चकितंसभयंयथास्यात्तथाविलो
किताःदृष्टाःसकल दिशोयया।पुनःकथंभूतंकृष्णं।रतेरभसउत्साहस्तस्यभरेणा
धिक्येनहसंतंसस्मितमुखं।अस्मिन्गीतेपूर्वार्द्धेराधाविशेषणं।उत्तरार्द्धेकृष्ण
स्येतिवोधव्यं॥१॥प्रथमेति॥२॥प्रथमसमागमेकृष्णसान्निध्येलज्जायुक्तया
।कथंभूतंकृष्णंचैलदूरीकरकरणायपटूनिकुशलानियानिचाटुशतानि।अ तैः
नुकूलंआनुकूल्यकारकंमृदुकोमलंवचनंभाषितंयस्याःसातयाशिथिलीकृ
तंडकूलंजघनस्थितंपट्टवस्त्रंयेन।२।तं।२।किसलयेति॥३॥किसलयनेपल्ल
वकृतशय्यायांनिवेशितयाउपवेशितया।कथंभूतंकृष्णंममेवउरसिवक्षस्थले
चिरंशयानंकृतालिंगनंइत्यर्थः।कथंभूतयामया।कृतंपरिरंभणपूर्वकंआ

मधुरं स्मितयुतं ८

गी०गो० लिंगनपूर्वकंचुंबनंयस्यासातया।कथंभूतंकलं।परिरभ्यआलिंग्यकृतंअधरपानं
२५ ओष्ठपानंयेनसतं॥३॥अलसेति॥४॥अलसेनसुरतसौख्येननिमीलितेमुद्रि
तेलोचने नेत्रेयस्याःसातया।पुलकावल्यारोमांचपंक्त्याललितौमनोहरौक
त पोलौयस्यतं।श्रमजलेनसुरंजनितेनवारिणासिक्तंकलेवरंयस्याःसातया
वरमदनमदात्।उत्तमकामजनितहर्षात्।अतिलोलंअति.चंचलंतंकलंइ
त्यर्थः।कोकिलकलरवकूजितयाजितमनसिजतंत्रविचारं।कोकिलकल
रववत्।अव्यक्तध्वनिवत्कूजितंशब्दोयस्यास्तयाजितःमनसिजतंत्रविचारः।
कामशास्त्रेसिद्धांतोयेनतंश्लथाःशिथिलाःकुसुमाकुलाःपुष्पव्याप्ताःकुं राम०
तलाःचूर्णकुंतला।यस्यासातयानखजलिखितश्चिन्हितोघनोनिबिडःस्त २५

नभारोयेनतं।४॥चरणेति॥५॥चरणयोपादयोःरणितौशब्दितौनूपुरौयस्याः
सातयापरिपूरितंसंपूर्णकृतंसुरतवितानंसुरतसमूहोयेनसतंमुखरा।श
ब्दायमानाविश्लथखलाउन्मुक्तामेखलाकांचीयस्यासातया।सकचग्रहणंकेश
सहितंचुंबनदानंयस्यसः।तं।६।रतिसुखसमयेति॥७॥रतिसुखसमयेसु ये
रतसुखकालेप्रीत्याअलसयाआलस्ययुक्तयादरमुकलितनयनसरोजं
।ईषन्मीलितनेत्रकमलं।निःसहाअसमर्थानिपतितातनुलताशरीरल
य तास्याःसाकथंभूतंकलं।मधुदैत्यसूदयसीतितं।उदितमनोजंजातकामं॥ त
॥श्रीजयदेवेति॥८॥इदंश्रीजयदेवेनभणितंउक्तंगीतं।कर्तृपारलौकिकं
शुभानिहवितनोतुकेषांगायतांश्रृण्वतांचकथंभूतंजयदेवभणितंअ

गी॰गो॰ तिशयं अधिकं मधुरिपुनिधुवनशीलं कलसुरतचरितं यस्मिन्। पुनः कीदृशं उ
२६ त्कंठितया गोपवध्वा राधिकया . कथितं पुनः कीदृशं सलीलं। शृंगाररसे
मसदृितं॥८॥ हरिरभिसारे॥१॥ हे सखि गोविंदं कलं पश्यामि अहं हृष्यामि
चाहर्षं प्राप्नोमि। कथंभूतं गोविंदं कानने वृंदावने व्रजसुंदरीगणवृतं गोपीस
मूहेन वेष्टितं। पुनः कीदृशं। मामुद्वीक्ष्य मां दृष्ट्वा हस्तात् अस्तो विगलितः विला
स वंशः क्रीडावंशो यस्य तं पुनः कीदृशं अनृजु इति अनृजुभ्रूवल्लिमतीनां कुटि
४ लभ्रूलतानां वल्लवीनां गोपीनां वृंदे समूहे। उत्सारितऊर्द्ध तिर्यग्गामिदृगंतवीक्षितं
कटाक्षेक्षणं यस्य पुनः कीदृशं अतिस्वेदेनातिघर्मेणार्द्र गंडस्थलं यस्य पु
नः कथंभूतं विलज्जितस्मितं सलज्जाहास्यं तदेव सुधा अमृतं तेन मुग्धा राम॰
२६

नेनं मुग्धमनोहरमुखं॥१॥ इति ... ॥ हे सखि दुरालोकः दुःखेन आलोक्यते
वियोगिनां मुद्वेगजनितत्वात् दुरालोकस्तोकोऽल्पः स्तबको गुच्छो यस्य नवाशो
कलतिकाविकासः उद्योतः मां व्यथयति पीडयति। किंच। कासारोपनपवनोपि
सरोवरनिकटवतपवनोपि मां व्यथयति। अपि चूतानां आम्राणां। इयं मुकुल
प्रसूतिः कलिका इव मां न सुखयति। कथंभूता प्रसूतिः भ्राम्यंतीनां चलंती
नां भृंगीनां भ्रमराणां रणितैः शद्वितैः रमणीया मनोज्ञापीत्यर्थः शिखरिणी
प्रशस्ताग्रभागवती॥२॥ अधुना कविर्लोकानाशिषयति। साकूतेति। ३। नवः शृंगार
रसरूणो केशवः। वः युष्माकं भक्तानां क्लेशं दुःखं हंतु दूरीकरोतु कीदृशः केशवः गो
पीनां निभृतं गोप्यभावं॥ निरीक्ष्य दृष्ट्वा काचित् दयितां वल्लभां अंतर्मनसि चिरं चिं
२

कुंतलः साकूतं

तयन्।पुनः कीदृशः मुग्धमनोहरः मोहयुक्तसुंदरः कीदृशं निभृतं साभिप्रायं स्मि
तामीषद्धास्यं यत्र आकुला अस्तव्यस्तः गलत् उन्मुक्तिर्भवन्।धम्मिल्लकेशपाशो यत्र
।उल्लसिताउच्चैः कृताः।भ्रूवल्ली यत्र अलीकेन छलेन दर्शितभुजामूलोर्द्धहस्तस्तना
यस्मिन्।भुजाश्च वालाश्च अर्द्धहस्ताश्चेति द्वंद्वः॥१॥इति श्रीगीतगोविंदे जयदेवकृ
तौ अक्लेशकेशवो नाम द्वितीयः सर्गः॥२॥इति श्रीअक्लेशकेशवकुंजरतिलकनामा
षष्टः प्रबंधः॥६॥गौडकृतिरागे॥गानगुणैरधिकैरनुगतं॥तनुते धातुं बुधसंमतं
नत्वा विधिमिह सुरवरनतं।कुंभनरेशो लंकृतियुतं॥१॥कंसारिरपि संसार।वासना
बंधशृंखलां।राधामाधाय हृदये।तत्याज व्रजसुंदरीः॥१॥इतस्ततस्तामनुसृत्य रा
धिकामनंगबाणव्रणखिन्नमानसः।कृतानुतापः स कलिंदनंदिनी।तटांतकुंजे नि

षसाद माधवः॥२॥मानेमंठनालेगुरुणा त्रनिमंठम्त्रं॥ मामियं चलिता विलोक्य
वृतं वधूनिचयेन।सापराधतया मयापि न वारितातिभयेन॥१॥हरिहरिहतादरतया ग
ता सा कुपितेव॥ध्रुवपदं॥किं करिष्यति किं वदिष्यति सा चिरं विरहेण।किं जनेन
धनेन किं मम जीवितेन गृहेण॥२॥चिंतयामि तदाननं कुटिलभ्रु कोपभरेण॥शो
णपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥३॥तामहं हृदि संगतामनिशं भृशं रमया
मि॥किं वनेनुसरामि तामिह किं वृथा विलयामि॥४॥तन्वि खिन्नमसूयया हृद
यं तवाकलयामि॥तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि॥५॥दृश्यते पुरतो ग
तागतमेव मे विदधासि॥किं पुरेव ससंभ्रमं परिरंभणं न ददासि॥६॥क्षम्यतामप
रं कदापि तवेदृशं न करोमि॥देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि॥ ७ वां

तंजयदेवकेनहरेरिदंप्रवणेन तिंदुबिल्वसमुद्रसंभवरोहिणीरमणे
न ८. हृदिबिसलताहारोनायंभुजंगमनायकः कुवलयदलश्रेणी
कंठेनसागरलद्युतिः मलयजरजोनेदंभस्मप्रियारहितेमयि प्रहर
नहरभ्रांत्यानंगक्रुधाकिमुधावसि १ पाणौमाकुरुचूतसायक
ममुंमाचापमारोपय क्रीडानिर्जितविश्वमूर्छितजनाघातेनकिं
पौरुषं तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षाशुग श्रेणीज
र्जरितंमनागपिमनोनाद्यापिसंधुक्षते २ भ्रूचापेनिहितःकटा

क्षविशिखोनिर्मातुमर्मव्यथां श्यामात्माकुटिलःकरोतुकबरीभा
रोपिमारोद्यमं मोहंतावदयंचतन्वितनुतांबिंबाधरोरागवान् सद्वृ
त्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति ३ तानिस्पर्शसुखानि
तेपितरलाः स्निग्धादृशोविभ्रमाः तद्वक्त्रांबुजसौरभंसचसुधा
स्यंदीगिरांवक्रिमा साबिंबाधरमाधुरीतिविषयासंगेपिचेन्मान
संतस्यांलग्नसमाधिहंतविरहव्याधिःकथंवर्द्धते ४ भ्रूपल्लवंधनु
रपांगतरंगितानिबाणागुणःश्रवणपालिरितिस्मरेण तस्याम नं

स्यमधुरराधा

गजयजंगमेस्वनाया॥ मस्त्राणि निर्जितजगंति किमर्पितानि॥ध्वति
र्थकंठविलोलमौलितरलोत्तंसस्य वंशोच्चर ज्ञीतिस्थानकृताव
धानललनालक्षैर्नसंलक्षिताः संमुग्धेमधुसूदने मुखेंदो मृदु
वः स्पंदंकंदलिताश्चिरं ददतु क्षेमंकरा क्षोमेयः॥ [illegible]
[illegible] मधुसूदना [illegible] इति श्रीगीतगो [illegible]
[illegible]
[illegible] कंसारिपि श्रीः २९

रप्यमोपि राधां हृदयेमनसि आधाय संस्थाप्य व्रजसुंदरीगोपी
स्त्याज त्यजतवान्॥ कीदृशीं राधां॥ संसारवासनाबद्धश्रृंखलां
निगडरूपां॥१॥ [illegible]॥ समाधवः इतस्तः कलिंदनंदिनीतटी
तकुंजे॥ यमुनाकूलेलतागृहे निषसाद स्थितवानिषण्यर्थः॥ किंकृत्त
इतस्ततः॥ अनेकस्थानेषुतां राधां अनुहृत्य अन्वेष्य॥ कीदृशः॥
अनंगबाणव्रणेन घाणस्तेन खिन्नमानसं मनो यस्य॥ कृता
नुतापः कृतपश्चात्तापः॥ कृतानुतापत्वमेवाह गीतेन [illegible]

गी०गो० ॥३०॥

[illegible] ॥ हरिहरीति

खेदानुकारे॥ सा राधा हृता दरेन तया॥ हन्त वक्रमानत्वेन कुपितेव कौ

पं प्राप्तैव गता अन्यया न गता॥ सा ऊब्धैव धूनिश्चयेन गोपीसमूह

न हृत्तं वेष्टितं विलोक्य॥ चलिता इतो गता॥ इति भिन्नैव वाक्यरच

ना॥ मया पिहुक्षेनापि॥ सापराधं तया॥ हृतापराधत्वेन हेतुना॥

अतिभयेन न वारिता॥ कथंभूतेन मया॥ अतिशयितं भयं यस्येति

॥२॥ [illegible] ॥ सा राधा चिरं विरहेण चिरकालवियो ॥श्रीः॥ ॥३०॥

गेन किं करिष्यति किं वा दिष्यति॥ तां राधां विना मम लोकेन जनेन किं॥

धनेन किं जीवितेन किं॥ गृहेण किं तां विना सर्वं निःफलमित्यर्थः॥२॥ चिं

तयामीति॥३॥ अहं तदाननं राधामुखं चिंतयामि स्मरामि॥ कीदृशं त

दाननं॥ कोधातिशयेन कुटिलं वक्रे भ्रुवौ यस्मिन्॥ किमिव शोणपद्म

मिव रक्तोत्पलमिव॥ कीदृशं शोणपद्मउपरि भ्रमता भ्रमरेण आकुलं

॥३॥ तामहं मि[illegible] अहं हृदि संगतां स्थितां राधां॥ अनिशं वारंवारं भृ

शमतिशयेन रमयामि॥ क्रीडया मोतिभाव॥ इह वने तां राधां किमनुसरा

गी०गो० मित्याह॥ संगतं तत्ता देवद्वृथाच्यर्थमेवं किं विलपामी विलापं करोमि॥ ४॥
॥३१॥ हि सगतां ... तन्वांगि ... हे तन्वि अश्रसयया असहिष्णुत्वेन खि
न्नं दुःखितं वहृदयं अकलयामि। तर्कयामि तत्तस्मादहं नेत्रेभिनजा
ने। कुतः कुत्र गतासि तेन कारणेन तु अहं अनुनयामि। प्रसादयामि क्रिय
च्छपार्थे पदमिति चतुर्थी नेइति॥ छ यायाम मिप्रेतानि संप्रदानं ४॥ ६
नति॥ ५॥ हेराधे त्वं मम पुरतः। अग्रे गतागतं आगमनागमनेन मे व वि धा
सि करोषी तिरस्यते तेन हि पुनरेव पूर्ववत्॥ ससंभ्रमं सवेगं परिरंभणं आलिं ॥श्री॥ ॥३१॥

मा दे

ग नं देहि नेदासि॥ ५॥ क्षम्यतां॥ ... हे सुंदरी सर्वथैव मम अपराधं क्षम्यतां॥ अ
परमीदृशं तव अपराधं कदापि न करोमि अत्र एवं मम दर्शनं देहि। यतः अ
हं मन्मथेन कामेन दुनोमि पीडामनुभवामि॥ ६॥ ... जयदेवके
न इदं गीतं वर्णितं कीदृशेन जयदेवकेन हरेः शरणेन तेन कृष्णस्याराधनेन पुनः
कीदृशेन. किंदुबिल्वं जयदेववंशतदेवसमुद्रस्तस्मात् संभवो यस्य एता
दृशो रोहिणीरमणः चंद्र इव यथा सागरादुत्पन्नश्चंद्रस्तथा किंदुबिल्वे
ऽस्मिन् जयदेव इति॥ यद्वा किंदुबिल्वसासनः ... पल्लवं धनुरपांगतरंगि

गी०गो० नानीति ॥१॥ इति पूर्वोक्तप्रकारेण स्मरेण ॥ नयनारा धायां अस्या ॥ शि-
३२ किं अर्पिता निस्थापितानि । कीदृश्यां तस्या अनंगस्य कंदर्पस्य जयेत्रै
लोक्यविजये ॥ जंगमदेवतायां ॥ गमनशीलदेवतारूपायां कीदृशा एव
स्याणि निर्जितजगंति त्रैलोक्यानि इति ॥ भ्रूपल्लवं भ्रूलता धनुः
अपांगतरंगितानि कटाक्षनिरीक्षणानि बाणाः ॥ श्रवणपालिः कर्ण
प्रदेशः गुणश्च [illegible] ॥१॥ [illegible] ॥२॥ अनंग त्वमपि हरभ्रांत्या
महादेवभ्रमेण नप्रहारं कुरु कुद्धा कोपेन अपि किमु किमिति धावसि मा श्री:
त्वं ३२

ल
रयि मुधा वृत्तं करोषि ॥ हरभ्रांति परिहरेति हे काम मम हृदये वि-
लसता हारो मृणाललता हारो वर्त्तते न अयं भुजंगमनायकः शेषः
दल मम कंठे ॥ कुवलयश्रेणी नीलोत्पलपंक्तिर्वर्त्तते न सा गरलद्युतिर्हा
लाहलदीप्ति ॥ इदं मलयजरजो वर्त्तते ॥ चंदनालेपो वर्त्तते नेदं भस्म
रजः कीदृश्याम मयि प्रिया विरहिते राधा वियोगिनी ॥२॥ पा[illegible]
डा [illegible] हे क्रीनिर्जित विश्वलीलाविजितभुवन काम अमुं च तसाय
कं ॥ आम्रपुष्पबाणं पाणौ हस्ते मा कुरु चापं धनुः मारोपय सर

॥गी०गो०॥
॥२२॥

शारंभा कुर्वित्यर्थः ॥ यतः मूर्छितजना घातेन किं मूर्छितजनपी
डया किं तपौरुषं कस्तव पुरुषार्थः ॥ मूर्छितत्वे कारणमाह तस्या इति
तस्या एवराधाया एवमृगीदृशो हरिणनयनायाः मनसिजेन का
मेन प्रेंखता चलता ॥ कटाक्षानलानां कटाक्षवह्निनां श्रेण्या पंक्त्या
जर्जरितं जर्जरं जातं खंडखंडी भूतं ॥ ममम नः ॥ मनागपि स्वल्पम
पि नाद्यापि संधुक्ष्यते अंकुरितं भवति कविल्के टाक्षाशुगेतिपाठः
तदा कटाक्षएवाशुगाः बाणाः ॥ ३ ॥ अधुना मनो विषयीकृता राधा

॥श्री॥
॥२२॥

अतिस्वयं दुःखमाह ॥ भ्रूचापेति ॥ ४ ॥ हे तन्वी हे कृशांगी भ्रूचापे भ्रुवा
वेव चापं धनुः ॥ तत्र निहितः अर्पितः कटाक्षः विशिखः ॥ कटाक्षबाणः
मर्मव्यथां मर्मपीडामिव निर्मातु करोतु विशिखस्य मर्मव्यथाजन
कत्वं युज्यत एवेति भावः ॥ अनुचरस्यामात्मानुरूपामवर्णः कुटिलो
वक्राकारः कबरीभारो पि केशसमूहोपि मारोद्यमकामोत्पन्नं ता
नत्केरोतु ॥ मलिनस्य कुटिलस्य वा मारणोद्यमं युज्यत एव ॥ अयं च
बिंबाधरः बिंबोष्ठः मोहं तनुतां विस्तारयतां ॥ कथंभूतो बिंबाधरः

गी०गो० ३४ रागवानुलोहितवर्ण॥ रागिणो विषयिषिण॥ मोहे मम त्वं युज्यत
एव॥ सद्वृत्तः साधुवर्तुलः॥ तववृत्तनमंडलः मम प्राणैः॥ कथं कीति स
द्वृत्ताः खलु परप्राणघातका भवंति॥ इति॥ ता निश्चयं रसिकत्वा निते चैत
रलाः॥ स्निग्धेति॥४॥ ता न्येव स्यं रसिकत्वा नियां निपुणानां पिकासंग
मस्त्रनुभूतानि॥ नेत्र नतरलाः॥ स्निग्धाः प्रेमान्विताः॥ दृशौ चक्षुषो विभ्र
माविलासाः एतेन रूपं॥ तदेव वक्त्रांबुजं सौरभं वदनकमलस्क रभि
त्वं एतेन गंधत्वं सच च सुधास्यंदी अमृतं इव युक्तः गिरां वचसां वक्रि श्रीः ३४

मा वक्रत्वं एतेन शब्दः साविंबाधर माधुरी॥ बिंबसदृशोष्ठमाधु
र्यं॥ तदेव॥ एतेन रस इति विषयासंगे पि तस्या रूपस्पर्शादीनां साम्
निध्ये पि मम मानसं मनः॥ तस्याराधायाः लय समाधि प्रागस्थानं
वर्तते तदा हे तरे खेदे विरहव्याधिः॥ कथं वर्तते॥ ध्यानयुक्तस्य योगिनां
व्याधिर्नास्ति॥५॥ [illegible]॥६॥ मधुसूदनस्य लक्ष्मस्य कटाक्ष
मयः॥ कटाक्षदर्शनतरंगाः युष्माकं भक्तानां क्षेमं कल्याणं विदध
तु॥ अयं छंनु कीदृशा॥ मधुरे स्कंदेराधामुखेंदौ राधामुखचंद्रे संमु

गी०गो० ३५

गधं श्रमुक्तं मृदुस्पंदं च किंचिच्चलनं च यथा स्यात्तथा कंदलिताः पल्ल
विताः पुनः कीदृशाः वंशाद् उच्चरन्तः स्फवेणौ निर्गच्छन्तः स्फगीतिस्थानेषु
ह्लत्तावधानेर्दत्तमनो मिलल्लना लक्षैर्गोपांगनासहस्रैर्न संलक्षिता
नत्ता तान दृष्टा इत्यर्थः कीदृशस्य मधुसूदनस्य तिर्यक् वक्रः कंठो यस्य
विलोलः चंचलो मौलिर्मस्तकः किरीटो वा यस्य तरलश्चंचलः उत्तंसः
श्रवंतंसो यस्य सः पश्चात्कर्मधारयः लक्ष पदं च कुत्ला पक्षकं मुग्धो
हरिर्विरहीत्यर्थः॥ ३॥ [illegible]

[illegible]
[illegible] ॥ यमुनातीरवानीरनिकुंजे मंदमास्थितं
प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी॥१॥ [illegible]
[illegible]॥ ॥मध्यकमथनहृदि लक्ष्तां परा॥ जयदेवीये मातो बरं॥ नुनुते
धातुश्क्रतिस्करवकर्षं कुंभो रूपशलवंच स्थिरा॥१॥ निंदति चंदनमिंदुकि
रणमनु विंदति खेदमधीरं॥ व्यालनिलयमिलनेन गरलमिव कलय
ति मलयसमीरं॥ सा विरहे तव दीना माधव मनसिज विशिखभया

गी०गो० ३६॥

भाव

दिवि नयाति विलीना ॥ध्रुवपदं॥ अविरलनिपतितमदनशरादिव भ
वदवनाय विशालं ॥ स्वहृदयमर्मणि वर्म करोति सजलनलिनीदल
जालं ॥२॥ कुसुमविशिखशरतल्पविलासकलाकमनीयं व्रतमिव त मनल्प
व परिरंभसुखाय करोति कुसुमशयनीयं ॥३॥ वहति च गलितवि
लोचनजलभरमाननकमलमुदारं ॥ विधुमिव विकटविधुंतुददंत
दलनगलितामृतधारं ॥४॥ विलिखति रहसि कुरंगमदेन भवंतमस
मशरभूतं प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं ॥५॥ प्र श्रीः ३६॥

तिपदमिदमिति निगदति माधव तव चरणे पतिताहं ॥ त्वयि विमुखे म
यि सपदि सुधानिधिरपि तनुदाहं ॥६॥ ध्यानलयेन पुरः परिकल्प्य भ
वंतमतीव दुरापं ॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापं
॥७॥ श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं ॥ हरिविरह
कुलवल्लवयुवतिसखीवचनं पठनीयं ॥८॥ इति श्री [illegible]
[illegible] ॥ इदानीं राधासखी माधवं प्रत्याह
वक्ष्यमाणोत्कंठवती कीदृशं माधवं यमुनातीरस्थः वानीरकुंजः वेतसो
नि

दा

॥गी० गो० ॥२७॥ पल्लक्षितलतागृहे मंदं तृष्णी आस्थितं आसीनं ॥ पुनः कीदृशं प्रेम
भरेण ॥ राधायाः प्रेमातिशयेन उद्भ्रांतं ॥ उद्विग्नचित्तं ॥ कथमिव प्रसाद
यिष्यतीति उद्भ्रांतं ॥१॥ उ [illegible]
[illegible] ॥ सा विरहे तिष्ठति ॥ अस्य कर्णाटकरागः
रागलक्षणं ॥ कपालपाणिर्जगदंतपत्रमेकं वहन् दक्षिणकर्णपूरं
संस्तूयमानः स्मरवारणाद्यैः कर्णाटकरागः सितनीलकंठः ॥ इति
॥ अत्र गानं ॥ विरहो [illegible] वासकसज्जा सोत्कंठा स्वाधी श्रीः ॥२७॥

न भर्तृका तथा ॥ कलहांतरिता चापि विप्रलब्धाभिसारिका ॥ खंडि
ता प्रोषिता चैव नायका चाष्टवर्णिता ॥ तत्रोत्कंठालक्षणं भरतो
क्तं ॥ यस्याः समुचितेप्यन्हि प्रवासीनेति वल्लभः सा स्मरानलसंतप्ता
विरहोत्कंठिता मता ॥ गीतार्थस्तु ॥ हे माधव कृष्ण सा राधा तव विरहे
सति दीनाऽतु खिन्ना ॥ त्वयि त्वद्विषयभावनया अनुचिंतनेन कामबाण
हृष्य हृदये प्रविश्य स्थितं मा न पीडयिष्यति ॥ इति भावनया आली
ना प्रविष्टा कस्मादिव मनसिजविशिखभयादिव ॥ केन प्रकारेण त्वा

॥गी०गो०॥ ॥२५॥

दु

हा॥ हे कृष्ण सा राधा चंदनं निंदति॥ इंदुकिरणं चंद्रदीप्तिं अनुलक्ष्मी
कृत्य अधीरं अनल्पखेदं विंदति लभते॥ मलयसमीरं मलयवातं॥ मा
लनिलयमिलिने नया लनिलयसर्पस्थानं चंदनवृक्षस्तस्य मिलने
न स्पर्शेन गरलमिव विषमिव कलयति मन्यते॥२॥ अविरलेति॥३॥ हे
कृष्ण राधा स्वहृदये मर्माणि सजलनलिनी दलजालं सजलनलि
नीपत्रसमूहमेव वर्म तनुत्रं करोति कस्मै प्रयोजनाय॥ स्वहृदयस्थि
तस्य भवतो रक्षणाय कस्मादिव॥ अविरलं निरंतरं निपतितो यो मद ॥श्रीः॥ ॥२५॥

भवद्रक्षणाय

नशरः कामबाणस्तस्मादिव॥ किंभूतं वर्म विशालं॥ विस्तीर्णं त्वं तस्य हृ
दये सर्वदा इति भावः॥ कुसुमेति॥४॥ कुसुमशयनीयं पुष्पशय्यां करोति श
कीदृशं॥ अनल्पविलासकलाभिः॥ बहुतरक्रीडाभिः कमनीयं सुंद
रं पुष्पशय्या स्वमेव मनोज्ञा इयं शय्या विरचने कुशला शय्याभावेपु
ष्पशय्यामेव करोतीत्यर्थः कमिव कुसुमशीशरः कामस्य शरा पु
ष्पाणि तान्येव तल्पं शय्या तादृशं व्रतमिव॥ शरशय्या शयनरूपं दारु
णं व्रतमिति भावः॥ किमर्थं व्रतमित्यत आह॥ तव परिरंभसुखाय अलि

वि

य

॥गी०गो०॥ ॥२१॥ गनस्करख प्राप्त मित्यर्थः॥३॥ आवहन्ती [illegible]॥ सा राधा उदारं मनोज्ञं आ
नन कमलं वहति धारयति॥ कीदृशं चलितं [illegible] लितं द्विलोचनजं
मिवे नेत्राम्बु तद्धारयती तिकमिव विधुं॥ विकटेन दारुणेन महता विधुंतुदस्य
राहोः दंतेन दलना तृगलितामृतधारं यस्मात्तं॥४॥ [illegible] हेकृ
ष्ण सा राधा अस्मरपार भूतं॥ कंदर्पस्वरूपं भवंतं त्वां रहसि एकांते कुरं
गमदेन कस्तूरिकया विलिख्य निश्चयः कामरूपस्य भवतः ऽधस्तात् म
करं कामवाहनं विनिधाय करे हस्तेन [illegible] नवचूतांकुरं नूतनाम्रस्वरूपं शरं बाण ॥श्री॥ ॥२१॥

णं च विनिधाय संस्थाप्य प्रणमति॥ पूजानंतरं प्रणामो युज्यत एवं
मकरस्य ध्वजप्रसिद्धेपि वाहनत्वेन दोषः॥५॥ प्रतिपदेति॥ हेकृष्ण
प्रति सा राधा पदं प्रतिक्षणं इदमपि निगदति वदति॥ हेमाधव हेकृष्ण॥ तव
चरणे पतिताहं॥ किमि [illegible] त्वत आह॥ त्वयि विमुखे पराङ्मुखे सति स
पदि तत्क्षणं सुधानिधिरपि चंद्रोपि दाहं तनुते॥ शरीरदाहं विस्तार
यति॥ स्वस्थं द्विप्येवं कुरुते अतः तव चरणे पतिता॥६॥ ध्यानलयेन
ति॥ हेकृष्ण अतीव दुरापं दुरितं दुरापं पिदुर्लभं भवंतं ध्यानलयेन वि

द न

गी०गो० ४० नेकाश्रुश्लेषेण पुरः। अग्रे परिकल्पनां कृत्वा मयि स्नेहं। इदानीम
पि न करोति। इति विलापं करोति हसति॥ नवदर्शनेन विषीदसि हास्या
नंतरं आनर्थक्यात्। अत एव रोदिति वंचति स्थानांतरं गच्छति स्थाना
न्तरे आलिंगनं करिष्यतीति॥ अत एव तापं मुंचति मनसा पंत्य
जति॥७॥ श्री ... वृति॥ श्रीजयदेवभणितं कथितं इदं गीतं॥ म
नसा चित्तेन अधिकं सातिशयं यं दिनटनीयं नर्तयितव्यं॥ यद्यहरि
विरहेण कृष्णवियोगेनाकुलाया वल्लवयुवत्य; राधायाः सखी श्री ४०

वचनं गीतरूपं पठनीयं॥ जयदेवगीतेषु इदमतिशायितमिति भावः
॥८॥ इति श्री हरिविलभ ... अशोक ... नामाष्टमः॥ नवमः॥
मालव ... गीयते॥ आवासो विपिनायते प्रियसखीमालापि
जालायते तापो विश्वसितेन दावदहनज्वालाकलापायते। सापि
त्वद्विरहेण हंत हरिणीरूपायते हा कथं॥ कंदर्पोपि यमायते विर
चयन् शार्दूलविक्रीडितं॥१॥ निःसारुकतालोसलन विनिहितमपि
हारमुदारं। सा मनुते कृशतनुरतिभारं॥ राधिका विरहतव केशव

गी० गो० ४१

जपं

ध्रुवपदं ॥ सरसमसृणमपि मलयजपंकं पश्यति विषमिव वपुषि सशं-
कं ॥ २ ॥ श्वसितपवनमनुपमपरिणाहं ॥ मदनदहनमिव वहति सदा-
हं ॥ ३ ॥ दिशि दिशि ॥ किरति सजलकणजालं ॥ नयननलिनमिव विगलि-
तनालं ॥ ४ ॥ नयनविषयमपि किशलयतल्पं ॥ कलयति विहितहु-
ताशनकल्पं ॥ ५ ॥ त्यजति न पाणितलेन कपोलं ॥ बालशशिनमिव
सायमलोलं ॥ ६ ॥ हरिरिति हरिरिति जपति सकामं ॥ विरहविहितम-
रणेव निकामं ॥ ७ ॥ श्रीजयदेवभणितमिति गीतं ॥ सुखयतु केशवप-

श्री: ४१

दमुपनीतं ॥ ८ ॥ सा रोमांचति सीत्करोति विलपत्युत्कंपते ताम्यति ॥
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि एतावत्यतनुज्व-
त्रै रे वरतनुर्जीवेत् किं ते रसात् स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोन्यथा
हस्तकः ॥ १ ॥ स्मरातुरां दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्यां ॥ निवृत्त-
बाधां कुरुषे न राधां उपेंद्र वज्रादपि दारुणोसि ॥ २ ॥ कंदर्पज्वरसंज्वराकु-
लतनोराश्चर्यमस्याश्चिरं ॥ चेतश्चंदनचंद्रमः कमलिनीचिंतासु तन्ताम्य-
ति ॥ किंतु क्लांतिवशेन शीतलतरं त्वामेवमेकं प्रियं ॥ ध्यायंती रहसि स्थि-

नी

गी०गो० ना क्षणमपि क्षीणाक्षणं प्राणिति ॥ क्षणमपि विरहः पुरा न सेहे

॥४२॥ नयन निमीलन खिन्नया यया ते ॥ श्वसिति कथमसौ रसालशाखां चि
राविरहेण विलोक्य पुष्पिताग्रां ॥४॥ वृष्टिव्याकुलगोकुलावनरसादुद्धृ
त्य गोवर्द्धनं । बिभ्रद्वल्लववल्लवीभिरधिकानंदाच्चिरं चुंबितः ॥ दर्प्पेणे
वतदर्पिताधरतटीसिंदूरमुद्रांकितो ॥ बाहुर्गोपतनोस्तनोतु भवतः
श्रेयांसि कंसद्विषः ॥५॥ [illegible]
[illegible]

[illegible] ॥ हे कुसुमहंते निखेदतु कारे सारा
धापि त्वद्विरहेण नव वियोगेन हरिणी रूपायते । मृगीरूपमिवाचरति ॥ क
थमित्यत आह आवासं गृहं विपिनायते वनमिवाचरति ॥ त्वद्विरहात् प्रि
यसखीमालापि ॥ सखीसमूहोपि स्वेच्छागमन निवारकतया जालायते
जालमिवाचरति ॥ तापोपि देहदाहोपि श्वसितेन श्वासोच्छ्वासेन दावदह
नज्वालाकरालायते ॥ अरण्यवह्निज्वालपरंपरेवाचरति ॥ कंदर्पोपि
कथं यमायते ॥ यम इवाचरति ॥ हा शब्दः स्वात्मनो दुःखाधिक्यसूचनार्थं

॥गी०गो०॥ ॥४२॥ कीदृशः कंदर्पशार्दूलविक्रीडितं आश्लेषितं चिरं चेयतः कुर्वन्नू ॥ स्मा
मरणं शार्दूलादेव भवति ॥१॥ इदानीं सखी पुनरपि राधायाः दुरवचेष्टितं
गीतेनाह ॥ देसाखरागेण ॥ एकतालीतालः ॥ स्तनविनिहितेति ॥१॥ रा
...विरहेति ॥ ध्रुवपदं ॥ रागलक्षणं ॥ आस्फोटनाविः हस्तो महर्षीनि
ध्रु युद्धसन्निविशालबाहुः प्रांशुः प्रचंडद्युतिरिंदुगौरो देसाखरागः किलम
ल्लमूर्तिः ॥ हे केशव त्वत्तव विरहेण तु सा अतिराधिका एवं चेष्टते ॥ की
दृशमित्यत आह तनुं शरीरं अनुपरि लस्य शरीरं सा राधा स्तनविनिहितम ॥श्री॥ ॥४२॥

पि स्तनयोः स्थापितं उदारं वक्षमोल्यं हारमपि मुक्ताहारमपि भारमिव
मनुते ॥१॥ सरसेति ॥ सा राधा सरसं मसृणं सांद्रं मलयजपंकं अपि चं
दनलेपमपि वपुषि संसक्तं विषमिव पश्यति ॥ ध्रुवं विरहान्त ॥ श्वसितेति ॥
श्वसितपवनं निश्वासवायुं मदनदहनमिव कामाग्निमिव दहति ॥ ध रतिबाधार
श पिसाहकं त्वा ॥ कीदृशं अनुपमः उपमारहितः परिणाहो विशालता यस्य अति
दीर्घदाहं कृत्वा ह युक्तं ॥७॥ दिशि दिशीति ॥८॥ नयनविषयमपि नेत्रगोचर
मपि किसलयतल्पं पल्लवशयनीयं न कलयन् जानाति कथं कुसुमायविक
ति

गी०गो० ४४ त्वं विरहः त कुतः कुतोऽराविकल्पोऽपि विकल्पो यत्र तं ॥ अतिसंताप
जनकत्वात् ॥ तादृशागमयति मनुते ॥ ४ ॥ स्मर... ॥ सा पाणितलेन हस्त
ज तलेन कपोलं गंडस्थलं न त्यजति ॥ स विनतत्वात् ॥ कमिव ॥ सायं संध्याकाले अ
लोलं निश्चलं बालशशिनमिव द्वितीयाचंद्रमिव ॥ हस्तेनाच्छादितत्वात् ॥
थं अल्पदृश्यतया च बालचंद्रसा ॥ हस्तस्य लोहितत्वात् ॥ संध्यासाम्यं ॥ ५ ॥
हरि... ॥ सा निकाममतिशयेन सकामसाभिलाषं हरिरिति ॥ २ ॥ जपति क
थंभूतं विरहविहितमरणं विरहे सा वियोगेन विहितं कृतं मरणं यस्याः सा श्री: ४४

अन्योऽपि मरणे हरिरिति मंत्रं जपति ॥ ६ ॥ श्रीजयदेवेति ॥ ७ ॥ श्रीजयदेवभ
णितं उक्तं इति पूर्वं गीतं केशवपदं ॥ केशव एव पदं विश्रांतस्थानं यस्य तं भ
क्तेभ्यः स्तवक तु कीदृशं उपनीतं ॥ उपढौकितं उपस्थितिकृतं ॥ ८ ॥ अधुना सा
तव विरहे प्रियमरणतइति स्वपन्नाह ॥ सा... ॥ ... ॥ हे सर्वैधप निर्मश्विनी अ
दास कुमारतुल्यपदि त्वं प्रसीदसि प्रसन्नो भवसि पूरं तनुः ॥ स्मरकुमारंगी ॥ सा राधा र
तावति ॥ अतनु ज्वरे सति तव रसात् ॥ किन्न जीवेत ॥ अपि तु जीवेदेव रसः शृं
गार अवौषधं व अथवा प्रसन्नाभावे हस्तकः ॥ हस्तालंबस्तु ... ॥ ज्वरे सति र
न्य

गी०गो० ४५ तेव्याधयो संति॥ तस्या वर्ज्जन इत्याह सा राधा रोमांचवति॥ रोमांचवति रोमांचाभवतीत्यर्थः सीत्करोति सीत्कारं करोति॥ विलपति विलापं करोति उत्कंपवति सकंपा भवति॥ ताम्यति ग्लानियुक्ता भवति ध्यायति चिंतयति॥ उद्भ्रमति उद्भ्रांता भवति॥ प्रमीलति नेत्रनिमीलनं करोति पतति शय्या दोगच्छति उद्यानि उत्तिष्ठति मूर्छति मूर्छां प्राप्नोति॥ ज्वरेण पुरुषस्य एतावद्भवति इति॥१॥ स्म ... ति॥ हे देववैद्यवहस्त्र अश्विनी कुमारवत् हृघस्करहेतुपेंद्र इंद्रानुज॥ त्वं राधां विमुक्तबाधां त्वं कपीडा॥ नकु श्रीः ४५

ह्वि तः

रुषे॥ अतोवज्रादपिदारुणो॥ सि॥ कुलिशादधिकविषमो॥ सिस्मरातुरां का मार्त्ता॥ पुनः कीदृशा॥ त्वदंगसंगा॥ तवशारीरसंबंध एव अमृतं तन्मात्रेण साध्या॥ प्रतिकार्या॥ एवंविधोपि नववितेने नैव जीवनी स्याह॥ ... ॥ हे कृष्ण अस्याः राधायाश्चेतो मनः चिरं चिरकालं चंदनस्य चंद्रमसः कमलिन्याश्चिंतास्मरणेष्वपिताम्यति ग्लानी भवति॥ इदं महदाश्चर्यं कीदृश्या॥ ... स्याः कंदर्पज्वरेण कामतापेनयः संज्वरः पीडा तेन आकुलाचं चलात नुशारीरं यस्याः किंतु रहसि एकांते स्थिता सो राधा त्वामभव

सं

गी०गो०
४६
कं असाधारणं प्रियवल्लभं ध्यायंती क्षणं मुहूर्त्तं क्षांतिवत्त्वेन क्षांत्या न
यात्वत्कांतिवत्त्वेनेति पाठः । न दृश्यसि न क्षणेन यास्यात्‌ क्षणांतरं आगमि
ष्यति इति अनुरागेण कथं प्राणिति जीवतीति कथय मिति प्रश्ने । कीदृशी
क्षीणाङ्गी [illegible] ति । हे हर्ष यथा राधया तव विरवियोग दुः
पूर्वं क्षणमपि न सहते सो दुः कीदृश्या राधया नयनयोर्नेत्रयो निमी
लनेन निरन्तरदर्शनघातात् चक्षुर्निमेषे खिन्नतया दुःखितया असौ राधा
त चिरविरहेण चिरवियोगेन कथं श्वसिति न श्वापयतीति किं [illegible] पुष्पिता श्री: ४६

गोरसालसाखांशाखा साखा विलोक्य दृष्ट्वा उदानी कथोपकमं त्वत्का
के विः भक्तानाशिषयती ॥४॥ [illegible] ॥१॥ गोपतनो गोपशरीर
स्य कंसद्विषः कृष्णस्य बाहुदण्डः भवतः तव भक्तस्येत्यर्थः श्रेयांसि कल्या
णानि तनोतु विस्तारयतु । कीदृशो बाहुः वृष्ट्या जलवर्षणेन व्याकुल
स्य गोकुलस्य गोपसमूहस्य अवनरसात् रक्षणानुरागात् गोवर्द्धनपर्वतमु
द्धृत्य उत्पाट्य बिभ्रत् धारयत् कीदृशो बाहुः वल्लवीभिः कंद
रीभिः गोपभार्याभिः अधिकानंदात् अतिहर्षात् चुंबितः पुनः कीदृशः कंदर्प

वल्लव भि:ना

गी०गो० ॥लं कामवश्येन ताभिः गोपीभिः अर्पिताः स्थापिताः अधरस्तथा एव
४७ सिंदूरचिन्हांकितो हितत्वात् नेरंकितः श्चिन्हितः स्निग्धः स्नेहवशा
त् ॥२॥ [illegible]
[illegible]
नि अहमिह ॥ सा मिया हि राधा ॥ मनुनय मदुवनेन वानयेथा
इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधां ॥१॥
वहति मलयसमीरे मदनमुपनिधाय ॥ स्फुटति कुसु श्री: ४७

मनिकरे विरहिहृदयदलनाय ॥२॥ तव विरहे वनमाली सखि सीदति ॥
ध्रुवपदं ॥ दहति शिशिरमयूखे मरणमनुकरोति ॥ पतति मदनविशि
खे विलपति विकलतरोऽति ॥२॥ ध्वनति मधुपसमूहे श्रवणमपिदधा
[illegible] ति ॥ मनसि कलितविरहे निशि निशि रुजमुपयाति ॥३॥ वसति विपिनवितानेत्य
जति ललितधाम ॥ लुठति धरणिशयने बहु विलपति तव नाम ॥४॥ भण
ति कविजयदेवे विरहविलसितेन ॥ मनसि रभसविभवे हरिरुदयतु सु
कृतेन ॥५॥ पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव नि

गी॰गो॰ कुंजमन्मथमहातीर्थपुनर्माधवः ध्यायंस्त्वामनिशं जपन्नपितवैवा
५८ लापमंत्रावली ॥ भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति ॥
रति ॥ सुखसारे गतमभिसारे मदनमनोहरवेशं ॥ न
कुरु नितंबिनि गमनविलंबनमनुसरतं हृदयेशं ॥ १ ॥ धीरसमीरे यमु
नातीरे वसति वने वनमाली ॥ गोपीपीनपयोधरमर्दनचंचल ... लक
रमाली ॥ २ ॥ ... नामसमेतं कृतसंकेतं वादयते मृदुवेणुं बहुम
नुतेतनुसंगत पवनचलितमपि रेणुं ॥ ३ ॥ पतति पतत्रे विचलति पत्रे श्रीः
५८

तेतनु

कितभवदुपयानं ॥ रचयति शयनं सचकितनयनं पश्यति तव पंथानं
॥ ३ ॥ मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलं ॥ चल सखि कुंजं
सतिमिरपुंजं शीलय नीलनिचोलं ॥ ४ ॥ उरसि मुरारेरुपहितहारे घन
इव तरलबलाके ॥ तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके
॥ ५ ॥ विगलितवसनं परिहृतरसनं घटय जघनमपिधानं ॥ किसलय
शयने पंकजनयने निधिमिव हर्षनिदानं ॥ ६ ॥ हरिरभिमानी रजनिरिदा
नी ॥ मियमपि याति विरामं ॥ कुरु मम वचनं सत्वररचनं ॥ पूरय मधुरिपु

गी०गो०
४०

कामं ॥ ७ ॥ श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं ॥ प्रमुदितहृ
दयं हरिमतिसहृदयं नमत सुकृतकमनीयं ॥ ८ ॥ विकिरति मुहुः श्वासा
नाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते
प्रियस्तव वर्तते ॥ १ ॥ त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तंगतो गो
विंदस्य मनोरथेन च समं प्राप्तं तमः सांद्रतां कोकानां करुणस्वनेन सदृ
शी दीर्घा मदभ्यर्थना तन्मुग्धे विफलं विलंबनमसौ रम्योभिसारक्ष श्री
४०

णः ॥ २ ॥ आश्लेषादनु चुंबनादनु नखोल्लेखादनु ……. स्वांतज
प्रोद्बोधादनु संभ्रमादनु रतारंभादनु प्रीतयोः अन्यार्थं गतयोर्भ्रमान्मि
लितयोः संभाषणैर्जानतो दंपत्योरिह को न को न तमसि व्रीडाविमि
श्रो रसः ॥ ३ ॥ सभयचकितं विन्यस्यंतीं दृशं तिमिरे पथि प्रतितरु मुहुः स्थि
त्वा मंदं पदानि वितन्वती कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सु
मुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थतां ॥ ४ ॥ राधामुग्धमुखारविंद
मधुपस्त्रैलोक्यमौलिस्थली नेपथ्योचितनीलरत्नमवनीभारावता

गी०गो० ५० संत्तकः स्वच्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषोदयः कंसध्वंसनधू
मकेतुरवतु त्वां देवकीनंदनः ५ [illegible]
[illegible]
[illegible] इदानीं कृष्णप्रेरिता
सखी राधामाह अहमिहेति १ इति मधुरिपुणा कृष्णेन नियुक्ता प्रेरि
ता सखी स्वयमेव इदं वक्ष्यमाणं राधां पुनः जगाद चेत्यन्वयः किं हे स
खी अहमिह निकुंजे निवसामि स्थितास्मि त्वं राधां प्रतियाहि अनुने श्री: ५०

उ

यच सांत्वयमदृश्वनेन ममवचसा राधां आनयेथाः आनयश्चेति १
[illegible] विनोदयंती दयितं स्वकेशी॥ स्वकंकणाचाम
रचालनेन॥ कर्णे दधाना स्मरपुष्पगुच्छं वरांगनेयं कथिता वराङी॥ [illegible]
[illegible] सा विकाना [illegible] रसिकरसस्त्वेसंस्कृता॥ पाकृता
३ पिष्ठा॥ ततोप्रभुभाषणा॥ ततः प्रियतरा वेश्या सर्वत्र श्लाभिसारिका॥
इति तल्लक्षणं भरते॥ लज्जां हित्वा समाकृष्य यौवने मदनेन वा॥ अभि
सारयते कांतं कथितासाभिसारिका इति॥ [illegible] नव विरहेति

गी०गो० ५१

ॐ ध्रुवपदं ॥१॥ हे सखि राधे तव वियोगे ॥ विरहे वनमाली कृष्णः सीदति । दुःखि
तो भवति । कस्मिन् सति मदनं कामं उपनिधाय सहायं कृत्वा मलयसमी
रे दक्षिणपवने वहति सति पुनः ॥ कस्मिन् सति विरहिणां वियोगिनां हृदय
दलनाय स्फोटनाय कुसुमनिकरे पुष्पसमूहे स्फुरति ॥ सति विकसति सति
१ वहतीति ॥२॥ हे राधे सः कृष्णः शिशिरमयूखे चंद्रमसि दहति सति मरणं
अनुकरोति । मरणानुकारं करोति मदनविशिखे कामबाणे पतति स
ति अति विलपति अतिशय विलापं करोति कीदृशः कृष्णः विकलतरः वि श्रीः ५१

कलतरः ॥ राधे० ॥३॥ मधुपसमूहे भ्रमरसमूहे ध्वनति शब्दं कु
र्वति सति । श्रवणं कर्णं अपिदधाति ॥ अंगुल्यग्रेण छादयति । मनसि व
लित विरहे जात विरहे सति निशि प्रतिरात्रं रुजं पीडां उपयाति ॥ अनुभ
वति ॥३॥ राधे० ॥४॥ स विपिन विताने ॥ अरण्य विस्तारे वसति तिष्ठति
अपरं ललितधाम सकंदं जगृहेत्यति ॥ धरणिशयने पृथ्वीशयने लुठ
ती विचेष्टते । बहुनाम वक्तु अनेकवारं विलपति ॥४॥ राधे० ॥५॥ कि
विजयदेव इति विरहिणां वियोगिनां विलसि तेन विलासेन भणति स

गी०गो०॥ ति वियोगवेष्टितं कथयति सा तिदत्यर्थः हरिरहमभिमनसि जयदेवसंवं
५२॥ धि विचित्रं स्फुरत्तेन पूर्वरागार्जितपुण्येन हेतुना उदयन्तु उदयं प्राप्नोतु कीदृ
शेन मनसि रभसा क्यहर्षे विभवश्च आधिक्यं यस्मिं॥ किंचन्त्वत्प्राप्त्यर्थे
तपः करोतीत्याह॥५॥ पूर्वेति॥६॥ हे राधे माधवः श्रीकृष्णस्तस्मिन्नेव
निकुञ्जमन्मथमहातीर्थे निकुञ्जमेव लतागृहमेव मन्मथमेव मन्मथमहा
तीर्थं कामतीर्थं॥ तत्र पुनः त्वां च नित्यं वारंवारं ध्यायन्नत्रैव च आलापमं
त्रावलीसंभाषणमेव मंत्रावलीमंत्राक्षरसमूहं जपन्नपि जपन्नेव भूयः श्री: ५२

पुनरपि॥ त्वत्कुचकुंभनिर्भरपरीरंभामृतं॥ त्वदीयस्तनकलशगाढालिं
गनं पीयूषमिवामृतमिव वाञ्छतीति॥ तस्मिन्कस्मिन् यथा महाती
र्थे त्वया समं सह पूर्वरातिपतेः कामस्य सिद्ध्यै मनोरथ आसादितो
प्राप्तः तपस्यतां सिद्धिप्राप्त्यर्थं तत्र मोक्षामृतं प्राप्यते तद्वत्॥६॥ इदानीं
[illegible] आलिंगतु भवत्या। गीतं ॥ [illegible] ॥ रतिसुखसारे॥
धीरसमीरे यमुनातीरे इति॥ [illegible] ॥ हे नितंबिनी महत्त्वितंब युक्ते राधे
यमुनातीरे अधुना॥ तस्मिन्वने वनमाली कृष्णो वसति तिष्ठति कीदृ

समीरे

गी०गो०
५३

धीरसमीरे॥ मंदमारुते॥ हे सखी गमनविलंबनं
तं हृदयेशं॥ श्रीकृष्णं प्रति अनुसर अनुगच्छ कीदृशं हृदये
शं॥ रतिसुखमेव सारो मुख्यं यस्मिन्॥ एतादृशं॥ अभिसारे संकेतस्था
नेगतं स्थितं॥ मदनवृत॥ कामवंतं॥ मनोहरवेशः शरीराकारो यस्य॥२॥
समनात॥ हे राधे कृष्ण नाम्ना तव नाम्ना समेतं॥ युक्तं मृदु वेणुं
मृदुशब्दयुक्तं वेणुं क्वणति संकेतस्थाने यथा स्यात्तथा अहं प्रत्यभिसारे
तिष्ठामि॥ त्वमत्रैव त्वरितमायाहि॥ इति संकेतं कृतः संकेतो यस्यां क्रि श्रीः ५७

यायां॥ तन्विति संबोधनं तव संगतपवनचालितशरीरसंबंधिवायुप्रेरि
तं रेणुमपि बहु साधुतरं मन्यते॥२॥ पतति पत्रे इति॥३॥ सहृदयः शयनं
शय्यां रचयति विलोकितवपथानं मार्गमच्वकितनयनं॥ यथा स्यात्तथा
पश्यति॥ कीदृशं यथा नं पतति पतत्रे॥ पक्षिणी गच्छति सति॥ पत्रे पर्णे वि
चलिति कंपति सति॥ शंकितं संभावितं भवत्या उपयानं समीपगमनं
यस्मिन्॥ राधा प्रायः समागच्छतीति॥ पतत्रं पक्षिणां पक्षः॥ तद्विद्यते
यस्येति अदर्शि आविदित्वात्॥३॥ मुखरमिति॥४॥ हे सखि राधे मुखरं॥ श

गी॰गो॰ ५४ ब्दयुक्तं मंजीरं नूपुरं त्यज कीदृशं मंजीरं । अधीरं शब्दाधिकारणात्वा
च्चं गमनस्तबकमित्यर्थः । केलीषु क्रीडायां सकलोलं अतिचंचलं । अ
त एव रिपुमिव शत्रुसमं रिपुरपि मुखरं । अधीरं शब्दवलस्य भवति मं
जीरं त्यक्त्वा सति तिमिरपुंजे । अंधकारसमूहयुक्ते कुंजलतागृहं चल
गच्छ । नीलनिचोलं श्यामं वस्त्रं । शीलय परिधेहि । अभिसारे अदर्श
नार्थं नीलवस्त्रपरिधानं क्रियते ॥४॥ [illegible] ॥ हे पीनगौरांगी
हे सुकृतविपाके पूर्वजन्मार्जितसुकृतस्य विपाकः फलं यस्याः तत्सं श्री॰ ५४

संबोधनं अन्यथा कुत्र विपरीतरतं कथं प्राप्यते मुरारेः उरसि
स्य उरसि वक्षसि त्वरति विपरीतपुरुषायितं सुरतं सुरतकाले । त
डिद्विविधो द्विराजसितो भिद्यते वर्तमानसामीप्ये इति लट्
कथंभूते उरसि । उपहितहारे अर्पितो हारो यस्मिन् । पुनः कथंभू
ते उरसि घन इव मेघसदृशे घनेन नरलवलाके चंचलवकसमूहः हार
स्य बलाका सा । अंतर सोः मेघश्याम नराधाया तडित् सामा ॥५॥
[illegible] ॥ हे राधे त्वं किसलयशयनेन पल्लवशय्यया पंकजनय

गी०गो० ५५ नेपुण्डरीकाक्षे कृष्णे जघनं कटिपूर्वभागे यस्य से गमय इति । वि
परीतसुरतं कीदृशं जघनं । विगलितवसनं त्यक्तवस्त्रं परिहृतवस
नं त्यक्तरसना क्षुद्रघण्टिका येन । अत एव अपिधानं आवरणं रहि
तं हर्षानिधानं आनंदस्थानं निधिमिव निधिसदृशं ॥ उद्या ॥ तमु
खे निधिहर्षाय भवति ६ ... हे राधे हारे पि अभि
मानी लघुलं न सहत इत्यर्थः ॥ इदानीं रजनिरपि रात्रिरपि विरामं अव
सानं यास्यति । वर्तमाने स्मर । मम वचनं कुरु श्री प्रमाण इत्यर्थ श्रीः ५५

कीदृशं मम वचनं श्री अ. वचनरचना यस्मिन् गतः च मधुरिपुकामं
कृष्णाभिलाषं ॥ ७ ॥ श्रीजयदेव... ॥ ८ ॥ हृतहरिसेवे कृता हरिसेवा
कृष्णं चित्तं नायेन तस्मिन् जयदेवे परमरमणीये अतिसमनोहरं
दंगीतं भणति कथयति ॥ सविप्रमुदितहृदयं संतुष्टचित्तं हरिं नमत
नमस्कुरुतेति भक्तान् प्रत्युक्तिः ॥ कीदृशं अतिसदयं अतिदयायुक्तम
संत्रहृदयो रस्या अश्रीः प्रसीदतीति नमनं कर्तव्यमिति भावः ॥ पुनः की
दृशं सकलसुकमनीयं पुण्येन वा लभनीयं ॥ ८ ॥ अधुना श्री धृगतं प्रेस्यति ॥

गी०गो० विकरतीति। हे कांतनव प्रिय: हृष्टो मदनकदनक्लान्तः कामकामपी
५८ डीपनभ्रो वर्त्तते तिष्ठति। केन प्रकारेणेत्यत आह विकिरतीत्यादि इदा
नीमपि नागतेति नि:श्वासमुहुर्वारंवारं विकिरति विक्षिपति। एकाग्रवि
त्ततया त्वामेव ध्यातु। नी सा पुरो नासाग्रं मुहुरीक्षते। पश्यति। ध्याने अ
दृष्ट्वा मुहुः कुंजलतागृहं। प्रविशति। अत्र भविष्यातीति। तत्रापि अदृष्ट्वा
मुहुः कुंजं रहस्येकासीत्यादि जल्पनूवदनु। ताम्यति दुःखिता भवति।
त्वामागतां दृष्ट्वा मुहुः श्रायांनागतां विज्ञाय मुहुः पर्याकुलैरक्षते दिशा श्रीः ५८

पश्यति इदानीमेव दृष्ट्वा पुनः कुत्र गतेति॥ २॥ [illegible] ॥ ५॥ हे मुग्ध
मूढे त्वद्वाक्येन अभ्यस्यामानसहितेन सम्मं सह संभ्रमसाम्येन अधु
ना इदानीं तिग्मांशुः सूर्यः अस्तंगतेति। अस्यामानसहितः सूर्यो
अस्तं गतः अभिसारण कालो यमित्यर्थः। गोविंदस्य कृष्णस्य मनोरथेन इ
दानीं राधा आगमिष्यतीति वा छन्नया गहतमः अंधकारः सांद्रतां निवि
डत्वं प्राप्त तम अभिसरणे योग्य मित्यर्थः। दीर्घमिदम्यर्थनाद्योग्रं
मता मि निमरीयपार्थना कोकानां चक्रवाका करुण स्वनेन विरहि

गी० ५७

यात्र्यन्ते यथा कोकानां कूजनं स्वनो नानाप्रकारः श्रूयते तथा मद्रि
याकाकूस्वरः संपद्यते वाऽत्र भवती॥ तस्मात्कृतो विलंबो विफलं अभिसो
अभिसारक्षणो अभिसरणकालो रम्यो रमनयोग्य इत्यर्थः॥ अभिसा
रसाधिक्यं भवतीत्याह॥ आश्लेषादिति॥ दंपत्योर्जायापत्योः तमसि अं
धकारे व्रीडाविमिश्रो लज्जायुक्तः रसो कः कः न भवेत् अपितु सर्वोऽसर्व
रवश्रृंगारादिः रसो भवत्येव कथंभूतयोः दंपत्योः॥ अन्यार्थपरस्त्रीपुरुष
र्थगतयोः संकेतस्थानप्राप्तयोः पुनः कीदृशयोः भ्रमानभ्रांतः गाढांध श्री: ५७

कारे स्पृष्टतमिलितयोः अनंतरं॥ आश्लेषादिविशेषणानि योजनीयानि
तत्र एव संभोगस्य क्रमः॥ प्रथमं आलिंगनं ततः चुंबनं ततो नखक्षतं ततः ख
कामोद्बोधः॥ ततो मैथुनं तत्प्रीतिस्तेभावनामिति तेन क्रममाह॥ आश्ले
षादिति॥ पुनः कीदृशः॥ आश्लेषादालिंगनादनु पश्चात् नखोल्लेखादनुप
श्चात् नखक्षतात् पश्चात् स्वांतजप्रोद्बोधादनु कामबोधात् पश्चात् संभ्रमादनुवे
गात् पश्चात् रतारंभादनु सुरतो योगात् पश्चात् प्रीतयोः तयोः पुनः कीदृ
शयोः संभाषणे सलापे जानतो॥ न मम इयं भार्या न मम अयं पतिः इति

गी०गी० ५८ त्वल्लाभात् लब्धः ॥ कृतार्थो भवति स्माह ॥ समयेति ॥ हे शशिमुखी स
वदने राधे स्कंभगः सौभाग्यवान् उत्कंठत्वात् पश्यन् उत्कंठितार्थता समुपैतु मामे
नु ॥ कीदृशीं मां तिमिरे अंधकारे सहितं पथी मार्गे सभयं च किंतभय विस्म
याभ्यां सहितं यथा स्यात्तथा दृशौ नेत्रे विन्यस्यन्तीं क्षिपंतीं निविडांधकार द
र्शनात् ॥ एवं अंधकारे निःशंकं गमनाद्विस्मयः पुनः कीदृशी प्रतितरु श
क्षमुकुः पुनः पुनः स्थित्वा मंदगमनेः पदानि चरणमापादानु वितन्वंती
कुर्वंती कुर्वाणा त्यासव चरणपातभयादिति भावः पुनः कीदृशी कथम श्री: ५८

पि अंधकारस्य निविडत्वात् केनापि प्रकारेण रहः एकांतस्थलं पुनः
कीदृशी अनंगतरंगिभिः कामस्य प्रसंगः पुनः पुनः उद्बोधस्तद्युक्तैः
अंगैः देहस्य पदानि रुपलक्षितं इदानीं कविर्भक्तजनमाशीर्यति राधा
मुग्धेति ५ देवकीनंदनः श्रीकृष्णः त्वां भक्तं चिरं अवतुं पुरिपुं रक्षतु की
दृशः कृष्णः राधायाः मुग्धं कंदर्पं मुखारविंदमुखकमलं तस्य मधुपो
भ्रमर इव नीलत्वात् मुखपानकर्तृत्वात् च पुनः कीदृशः त्रैलोक्य
स्य या मौलिस्थाने मुकुटस्थाने तस्य नेपथ्यो चितः अलंकारयोग्य नी

गी०गो० ५९

लरत्नमिव स्थितं पुनः कीदृशः अवनीभारावतारे भूभारावतारणे समः समर्थः पुनः स्वच्छंदानां स्वाधीनानां व्रजसुंदरीजनानां गोपिकानां मनस्तो षविघ्नध्वंसनो प्रस्तो षरात्रिमुखमिव रात्रिमुखेहि नार्थं स्तुष्यं ति पुनः कीदृशः कंसस्य मातुलस्य ध्वंसने मारणे धूमकेतुरिव स्थितः १ ॥ श्री

[illegible] ॥ नसा कौ [illegible]

[illegible] श्रीहरे [illegible]

[illegible] अथ तां गंतुमशक्तां चिर श्री ५९

रक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखी प्राह १ ॥ अनु ताले ॥ पश्यति दिशि दिशि रहसि भवंतं तदधरमधुरमधूनि पिबंतं २ नाथ हरे सीदति राधा वासगृहे ध्रुवपदं ॥ त्वदभिसरणरभसेन वलंती पत ति पदानि कियंति चलंती २ विहितविशदबिसकिसलयवलया ॥ जी वति परमिह तव रतिकलया ३ मुहुरवलोकितमंडनलीला ॥ मधुरिपुर हमिति भावनशीला ४ त्वरितमुपैति न कथमभिसारं हरिरिति वदति सखीमनुवारं ५ श्लिष्यति चुंबति जलधरकल्पं ॥ हरिरुपगत इति ति

गी०गो०
६९

सिरमनल्पं॥ ६॥ भवति विलंबिनि विगलित लज्जा। विलपति रोदिति वास
कसज्जा॥ ७॥ श्री जयदेवकवेरिदमुदितं रसिकजनं तनुतामतिमुदितं॥ ८॥
विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती॥
तव कितव विधायामंदकंदर्पचिंतां रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी॥
१॥ अंगेष्वाभरणं करोति बहुशः पत्रेपि संचारिणि॥ प्राप्तं त्वां परिशंकते वि
तनुते शय्यां चिरं ध्यायति॥ इत्याकल्पविकल्पतल्परचनासंकल्पलीला
शतं॥ व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति॥ २॥ किं विश्राम्यसि श्री:
६९

कृष्ण भोगी भवने भांडीरभूमीरुहि॥ भ्रातर्यासि न दृष्टिगोचरमितः सा
नंदं नंदास्पदं॥ राधाया वचनं तदध्वगमुखान्नंदांतिके गोपतो गोविंदस्य ज
यंति सायमतिथि प्राशस्त्यगर्भा गिरः॥ ३॥
[illegible]
[illegible]॥ २॥ अथागतेति॥ १॥ अथानंतरं सखी गोविंद
कृष्ण विषये कृष्णांतिकमागतेत्यर्थः। तत्स्थितिं राधा वर्णितं प्राह॥ क्व
ती॥ किं कृत्वा लतागृहे वा राधा गंतु॥ अशक्ता दृष्ट्वा कीदृशी चिरमनुरक्ता

गी०गो०
६९

नुरक्ता॥ अनुरागिणी कीदृशी गोविंदे मनसिजेन कामेन मंदे विग्रहे॥ गुण
करी रागः रूपकं तालः रागलक्षणं रतोत्कंठितकांतपथप्रतिक्षा॥ सालापयंती
मृदुपुष्पतल्पे इतस्ततः प्रेरितदृष्टिपाता स्यामा ननुगौणाकरीदृशः अ
स्मिन् श्वासकसज्जा वर्णयति॥ वासवेश्म स्फुविकल्पितनतल्पे॥ वासमार्गविधि
वद्धिधाना॥ पश्यति प्रियसमागमसज्जा पश्यति स्म प्रियवासकसज्जा
इति॥ ७ ध्रु॰ ॥ति॰ नाथहरेत्वसीदनीति॥ ३५ ,९८, नाथहरे हे हरु
क्तिः राधा तव वासगृहे वासस्थाने तत्वनत्वनः हीनाः सीदति॥ अवस

श्री:
६९

नो भवतीति कथमित्यत आह सा राधा रहसि एकांते स्थिता सती दिशि
भवंत पश्यति अवलोकयति कीदृशं त्वं अधरे वतं मधुराणि मधूनि म
ध्वीकानि पिबंतं॥ २॥ त्वदभिसरणेति॥ २ सा राधा कियति हीत्रीणि पदानि
चलती॥ गच्छंती निपततीति अधिकं गंतुं न पारयतीत्यर्थः कीदृशी त्वदभिस
रणरभसेन तवाभिसारोत्साहेन वलंती सज्जमाना॥ २ ...
हे हरे सा राधा तव रातिकलशा॥ तवस्फुरत चिंतनेन इह समये परं केवलं
जीवति जीवने हेतुरन्यो नास्तीत्यर्थः कीदृशी विहिताः कृताः विशदाः

गी॰गो॰
६२

शुभ्राः विसकिसलयान्येव मृणालांकुराण्येव वलयाः कंकणा यस्याः सा ७
[illegible] सा कीदृशी पूर्वश्लोकेनान्वयः पुनः पुनः अवलो
किता या कांक्षिता मण्डनलीला अलंकारविलासो यया तेन विना निरर्थ
कं मण्डनमिति पुनः वदति कीदृशी अहं मधुरिपुरिति कृष्ण इति भावनं
ध्यानमेव शीलं स्वभावस्तत्तं यस्याः सा ।४। [illegible] सा राधा
हरिः कृष्णः उपगतः प्राप्त इति अनल्पबहुतिमिरं मंथकारं श्लिष्यतीश्वा
लिंगति चुम्बतीव कीदृशं तिमिरं जलधरकल्पं मेघसदृशं स्निग्धत्वात्

श्री
६२

नीलत्वात् कृष्णसाम्यं तिमिरस्य ।५। [illegible] भवति त्वयि वि
लंबिनि विलंबं कुर्वति सति विगलितलज्जा गतलज्जा सा राधा विलप
ति विलापं करोति रोदनं करोति कीदृशी वासकसज्जा विहितसंविधा
नेत्यर्थः लक्षणं तत्कामेव ६ [illegible] जयदेवकवेः उदितं भा
षितं इदं गीतं रसिकजनं भक्तजनमतिमुदितमतिशयेन मुदितहर्ष
युक्तं तनुतां करोतीत्यर्थः [illegible] हे कितव हे धूर्त वंचक सा मृगा
क्षी हरिणनयना नवरसजलधि निमग्ना शृंगाररससागरे निमग्ना लीना

गी०गो०
६६

यभूवेत्यध्याहारः किं कृत्वा अमंदकंदर्पचिंता मदनः कामस्य चिंतनं स्म
रणं विधाय कृत्वा कीदृशी ध्यानेन वेवं चिंतने लग्ना तत्परा पुनः कीदृशी
विपुला महती पुलकपालिः रोमपंक्तिर्यस्याः सा ध्यानकल्पितनवकर
स्पर्शेन रोमांचभवतीत्यर्थः पुनः कीदृशी त्वद्दत्तदंतनखक्षतादिकं पारि
कल्पस्फीतेति स्फीतसीत्कारं प्रवृद्धसीत्कारं यथा स्यात्तथा आहरं
ती अंतः अभ्यंतरे जनितः उत्पादितः जडिमा जडत्वं यस्याः क्रियायां तथ
थाऽभवति तथा काकुना ध्वनिना ध्वनिविकारविशेषः साकुलं यथा स्यात्तथा

श्रीः
६६

स्यात्तथा साहरंती ध्यानेन नवकरनीवीबंधोन्मोचनासक्तपरिकल्प
निषेधवाक्यं वदंतीत्यर्थः १ अंगेष्वाभरणेति २ हृषावरतनुः स्कंद
रागी एवं विबुध्यात्यक्षी लक्ष्यवदति राधा अंगेषु हस्तादिषु आभरणं
अलंकारं बहुशः करोति एतेना कल्पतुक्तः पत्रपि पर्णेपि संचारिणी
चलिते सति त्वामागतमागतं परिशंकते तर्कयति एतेन वितल्पतुक्तः त्वा
मागतं सत्वा त्वा रथ्या शयनीयं वितनुते कुरुते एतेन तल्परचना उक्ता
चिरं ध्यायति चिंतयति कथं संगमयामीदं कर्तव्यमिति अनेन संकल्प

गी०गो० ६

बभूवेत्यध्याहारः किं कृत्वा अमंदकंदर्पचिंतां महतः कामस्य चिंतनं स्म
रणं विधाय कृत्वा कीदृशी ध्यानेन वैवं चिंतने लग्ना तत्परा पुनः कीदृशी
विपुला महती पुलककपालिः रोमपंक्तिर्यस्याः सा ध्यानकल्पितनवकर
स्पर्शेन रोमांचभवतीत्यर्थः पुनः कीदृशी त्वद्दत्तदंतनखक्षतादिकंपा
कल्परस्फीतेति स्फीतसीत्कारं प्रवृद्धसीत्कारं यथा स्यात्तथा आहरं
ती अंतः अभ्यंतरे जनितः उत्पादितः जडिमा जडत्वं यस्याः क्रियायां तद्य
थाऽभवति तथा काकुना ध्वनिना ध्वनिविकारविशेषः आकुलं यथा स्यात्तथा

श्रीः ६

स्यात्तथा आहरंती ध्यानेन नवकरनीवीबंधान्मोचनासक्तपरिकल्प
निषेधवाक्यं ददतीत्यर्थः १ अंगेष्वाभरणेति २ एकावरतनुः स्कंद
रागी एवं त्रिबुध्या मत्पृक्षी कृत्यवदति राधा अंगेषु हस्तादिषु आभरणं
अलंकारं बद्धरुः करोति एतौ नाकल्पउक्तः पत्रेऽपि पतत्यपि संचालिते
चलिते सति त्वां मानमागतं परिशंकते तर्कयति एतेन वितर्कउक्तः त्वा
मागतं सात्वा सा श्यासायनीयं वितनुते कुरुते एतेन तल्परचना उक्ता
चिरं ध्यायति चिंतयति कथं संगमया इदं कर्त्तव्यमिति अनेन संकल्प

गी०गो० लीलाशतमुक्तं ॥ इति पूर्वोक्तप्रकारेण अकल्पो भूषणं विकल्पस्तु के
६४ तल्परचनाशय्यारचनासु कल्पलीलाशतं स्वबहुचित्रविसृष्टातं यत्तेषु
असक्तापि प्रसक्तापि त्वया विना निशा रात्रि नैष्यति गमिष्यति ॥ २ ॥
[illegible] किं विश्राम्यसि इति क्षेपकः ॥ अधुना च विभक्ताना
शीषयति ॥ गोविंदस्य हृत्प्रगिरो वाचः जयति उत्कर्षेण प्रवर्त्तते कीदृ
शः गिरः सायं आतिथि प्रार्थनागर्भाः सायं संध्यासमये आतिथ्यानां
प्रशास्तं प्रश्नसा तद्गर्भे आशयो यासां ताः कथं मतस्य गोविंदस्य नंदात् श्रीः ६४

केनं दगोपपार्श्वं अध्वंगमुखात् पथिकाननात् राधायास्तद्भवनं गो
पतः श्रुत्वा तः किं तद्भवनं ॥ तत्राह हे आत्तिक पथिक भांडीरभूमीरु
हि भांडीरनाम्नि वटवृक्षे ॥ किं विश्रामं सि कीदृशो वृक्षे ॥ हृत्प्रभोगि
भुवने हृत्प्रस्य हृद् भोगिनः शृंगारिणो भवने वासस्थाने ॥ इत्यादृ
हत्तो गोचरं प्रत्यक्षी क्रियमाणेसानंदनंदास्यदं तं गोपगृहं तं नृया
सि इति राधावचनं अध्वगमुखात् दृति अत्तो गोविंदस्य गिरो जयंती
थं ॥ इति [illegible]

गी०गो०
६९

सर्गः ॥ ६ ॥ [illegible] धन्यं वकुंठाय पदं [illegible] मनाम [illegible] दशः प्रबंधः
॥ [illegible] ॥ अत्रांतरे च कुलटाकुलवर्त्मघातसंजा
तपातक इव स्फुटलांछनश्रीः वृंदावनांतरमदीपयदंशुदीपैः दिक्सुं
दरीवदनचंदनबिंदुरिंदुः ॥ १ ॥ प्रसरति शशधरबिंबे विहितविलंबे च मा
धवे विधुरा विरचितविविधविलापा सा परितापं चकारोच्चैः ॥ २ ॥ कथितस
मयेपि हरिरहह न ययौ वनं मम विफलमिदममलरूपमपि यौवनं १
यामि हे कमिह शरणं सखीजनवचनवंचिता ॥ ध्रु ॥ यदनुगमनाय नि

श्रीः
६९

शि गहनमपि शीलितं ॥ तेन मम हृदयमिदमसमशरकीलितं २ मम म
रणमेव वरमतिवितथकेतना ॥ किमिह विषहामि विरहानलमचेतना
३ मामहह विधुरयति मधुरमधुयामिनी ॥ कापि हरिमनुभवति कृतसुकृ
तकामिनी ॥ ४ ॥ अहह कलयामि वलयादिमणिभूषणं ॥ हरिविरहदह
नेन बहुदूषणं ॥ ५ ॥ कुसुमसुकुमारतनुमतनुशरलीलया ॥ स्रगपि हृ
दि हंति मामतिविषमशीलया ॥ ६ ॥ अहमिह निवसामि न गणितवन
वेतसा ॥ स्मरति मधुसूदनो मामपि न चेतसा ॥ ७ ॥ हरिचरणशरणज

गी०गो० ६६

यदेवकविभारती वसतु हृदि युवतिरिव कोमलकलावती ॥८॥ तत्किं
कामपि कामिनीमभिसृतः ॥ किंवा कलाकेलिभिर्बद्धो बंधुभिरंधका
रिणि वनोपांते किमुद्भ्राम्यति ॥ कांतः क्लांतमना ॥ मनागपि पथि प्रस्था
तुमेवाक्षमः संकेतीकृतमंजुवंजुललताकुंजेपि यन्नागतः ॥१॥ अथा
गतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां ॥ विशंकमाना रमि
तं कयापि जनार्दनं दृष्टवदेतदाह ॥२॥ वसंतरागे ॥ स्मरसमरोचितवेषा
गलितकुसुमदरविलुलितकेशा ॥१॥ कापि मधुरिपुणा विलसति युव श्रीः ६६

तिरधिकगुणा ॥ ध्रु० ॥ हरिपरिरंभणगलितविकारा ॥ कुचकलशो
परितरलितहारा ॥२॥ विकचजलजललितानन चंद्रा ॥ तदधरपानरभ
ल सकृततंद्रा ॥३॥ चंचलकुंडलललितकपोला ॥ मुखरितरसनजघनग
तिलोला ॥४॥ दयितविलोकितलज्जितहसिता ॥ बहुविधकूजितर
तिरससरसिता ॥५॥ विपुलपुलकपृथुवेपथुभंगा ॥ श्वसितनिमीलित
विकसदनंगा ॥६॥ श्रमजलकणभरसुभगशरीरा परिपतितोरसि रति
रणधीरा ॥७॥ श्रीजयदेवभणितहरिरमितं ॥ कलिकलुषं जनयतु प

गी० गो०
६०

रिरो मित्ता॥ ८॥ विरहपांडुमुरारिमुखांबुज॥ द्युतिरयं तिरयन्नपि वेदनां॥
विधुरतीव तनोति मनोभुवः॥ सुहृदये हृदये मदनव्यथा॥ १॥ गीतं॥ गूर्जरी रागे॥
समुदितमदने रमणीवदने चुंबनवलिताधरे॥ मृगमदति
लकं लिखति सपुलकं मृगमिव रजनीकरे॥ १॥ रमते यमुनापुलिनव
ने विजयी मुरारिरधुना॥ ध्रुवपदं॥ घनचयरुचिरे रचयति चिकुरे तरलि
ततरुणानने कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने॥ २॥ घ
टयति सुघने कुचयुगगगने मृगमदरुचिरूषिते॥ मणिसरममलं ता

श्री०
६०

रकपटलं॥ नखपदशशिभूषिते॥ ३॥ जितबिसशकले मृदुभुजयुगले
करतलनलिनीदले॥ मरकतवलयं मधुकरनिचयं॥ वितरति हिम
शीतले॥ ४॥ रतिगृहजघने विपुलापघने॥ मनसिजकनकासने॥ म
णिमयरसनं तोरणहसनं विकिरति कृतवासने॥ ५॥ चरणकिसल
ये कमलानिलये॥ नखमणिगणपूजिते॥ बहिरपवरणं यावकभरणं
जनयति हृदि योजिते॥ ६॥ रमयति सुदृशं कामपि सुदृशं॥ खलहलध
रसोदरे॥ किमफलमवसं चिरमिह विरसं॥ वद सखि विटपोदरे॥ ७॥

गी०गो० ६८ इह रसभणने कृतहरिगुणने ॥ मधुरिपुपदसेवके ॥ कलियुगचरि
तं न वसतु दुरितं कविनृपजयदेवके ॥८॥ नायातः सखि निर्दयो यदि श
ठस्त्वं किं दूति दूयसे ॥ स्वच्छंदं बहुवल्लभः स रमते किं तत्र ते दूषणं ॥ पश्या
द्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणै ॥ रुत्कंठार्तिभरादिव स्फु
टदिदं चेतः स्वयं यास्यति ॥१॥ [illegible] ॥ अनिलतरलकु
वलयनयनेन तपति न सा किसलयशयनेन ॥१॥ या रमिता वनमालि
ना सखि ॥ [illegible] ॥ विकसितसरसिजललितमुखेन स्फुटति न श्रीः ६८

सा मनसिजविशिखेन ॥२॥ अमृतमधुरमृदुतरवचनेन ॥ ज्वलति न
सा मलयजपवनेन ॥३॥ स्थलजलरुहरुचिकरचरणेन ॥ लुठति न सा
हिमकरकिरणेन ॥४॥ सजलजलदसमुदयरुचिरेण दलति न सा हृ
दि विरहभरेण ॥५॥ कनकनिकषरुचिशुचिवसनेन ॥ श्वसिति न सा
परिजनहसनेन ॥६॥ सकलभुवनजनवरतरुणेन ॥ वहति न सा रुजम
तिकरुणेन ॥७॥ श्रीजयदेवभणितवचनेन ॥ प्रविशतु हरिरपि हृद
यमनेन ॥८॥ मनोभवानंदनचंदनानिल प्रसीद रे दक्षिणमुंच वामतां

गी०गो० ६९ क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसि १ रिपु
रिव सखीसंवासोऽयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मि
न्दुनोति मनोगते हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृ
शां वामः कामो निकामनिरंकुशः २ बाधां विधेहि मलयानिल पंचबा
ण प्राणान्गृहाण न गृहं पुनराश्रयिष्ये किं ते कृतांतभगिनि क्षम
या तरंगैरंगानि सिंच मम शाम्यतु देहदाहः ३ प्रातर्नीलनिचोलम
च्युतमुरः संवीतपीतांशुके राधायाश्चकितं विलोक्य हसति स्वैर श्री: ६९

सखीमंडले व्रीडाचंचलमंचलं नयनयोराधाय राधानने स्वादु
स्मेरमुखोऽयमस्तु जगदानंदाय नंदात्मजः ४ सांद्रानंदपुरंदरादिदि
विषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितेंदीवर
स्वच्छंदमकरंदसुंदरगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदम
शुभस्कंदाय वंदामहे ५ ॥ इति श्रीगीतगोविंदे [illegible]
[illegible] सोत्कंठवैकुंठः
श्रीकृष्णो यत्र ५ अधुना तं द्रष्टुं हृदयमाजेन राधाया विरहव्यथाधि

गी०गो० ७० कथयर्णयन्नाह: अंगांमेरेति १ अत्रांगरेऽस्मिन्नवसरे इंदु: चंद्र:
अंशुजालै: किरणसमूहै: वृंदावनांतरं वृंदावनमध्यप्रदेशं अदी
पयन्प्रकाशितवान् इंदु: स्फुटलांछनश्री कलंकशोभा यस्य क
थंभूतइवकुलटानां अभिसारिकाणांकुलस्यसमूहस्यवर्त्मघातेन
मार्गप्रतिरोधेन संजातपातकइवउत्पन्नपातकइव पातकवत: कलं
कोऽस्यक्को भवतीति पुन: कीदृशा दिग्वधूसंदर्शनायकासा सा वधू
नस्यमुखस्य चंदनबिंदु: श्रीखंडतिलकइवस्त्रीजनोवर्तुलोभवती श्री: ७०

तिश्रस्रजीनांवृंदावनोद्योगमनाभावाद्धर्मधात: २ अत्रविप्रलब्धा
नायिकावर्ण्यते नेनलक्षणं भरतेविलसदनुरागाइतिकाप्रेक्ष्यपूर्वं
सरभसमपिधायप्रकापिसंकेतभूमौ॥ निमिलितिरवलुप्यस्यवल्लभोदै
वयोगात्तमधवदति भरतस्तानायिकाविप्रलब्धा॥२॥प्रसरानी॥नि॥
सारायाविरचितै: कृत: विविधोनानाप्रकारविलापोयस्मिन् उ
च्चैर्महांतंपरितापं दु:खचकाराकस्मिन्नराधिराधायरविंबचंद्रमंड
लेप्रसरति उत्कृष्टवतिसतिमाधवे वन्हधेचविहितविलंबे सति॥

गी०गो०। ८१ ॥ गीतं ॥ इमां लवंगलता ॥ प्रतिमंठतां ॥ ॥ विलापम ॥ ३ ॥ ना अथ न ॥

॥ अथपद ॥ हे इति सा चित्तसंबोधनं ॥ इह निर्जनवने स
खीजनस्य वचनैः छद्माः मम वैरिके ॥ वंचिता प्रवंचिता ॥ अहं कं पुरुषम
रणं रक्षितारं या मि गमिष्यामि कमेक जलमेव शरणं यामि जलप्रवेश
वरमित्यर्थः ॥ के मित्यत आह ॥ अहहेत्याश्चर्ये ॥ हरिः छद्मः कथित सम
येपि उक्ते कालेपि ॥ वनवृंदावनं ॥ संकेतस्थानं ॥ नयथड्यौ ॥ न गागम
छद्मोपभोगाभावात् ॥ ममैतदनुरूपयोग्यमपि यौवनं विफलं निर श्री: ८५

र्थकं ॥ १ ॥ यदनुगमनेति ॥ ॥ मया यदनुगमनाय छद्मस्यानुगमनाय
सकलेन संतोषितं तु ॥ निशि रात्रौ गहनमपि निर्जनवनमपि सेवितं तेन छ
द्मेन हेतुना मम हृदयं हृदयं विच्छं ॥ असमशरेण कामेन कीलितं वहं छद्मस्या
गमनाभावात् ॥ मम मेति ॥ ॥ इह वने अबलेतनाज्ञानशून्या विरहानलवि
योगाग्निं ॥ किमिति विषहामि ॥ सहामि तस्मात् मरणमेव वरं श्रेष्ठं ॥ म
रणे विरहानलाभावात् ॥ कीदृशी अहं अतिवितथा ॥ अति पर्थकित ना
शरीरसौंदर्योपभोगाभावात् ॥ ममहह ॥ ॥ अहहेति दुःखानुक

गी०गो० रंमधुरं मधुयामिनी मनोज्ञवसंतरात्रिर्या विधुरयानिकापि हृतसकहृत
८२ कामिनी। विहितपुष्पकांताहरिः हृष्टम अनुभवति उपभुंक्ते ५ अहहे
ति ६ अहहवलयादिमणिभूषणं कंकणप्रभृतिमुक्तालंकारभूषणं हरि
विरहदहनवहनेन हृष्टम वियोगधारणेन हेतुना वक्रुरूपणं अनिश्चयोप
चारं कलयामि मन्ये प्रियदर्शनेन स्त्रीणां अलंकारसाफल्यमिति भावः
६ [illegible] सरापि पुष्पमालापि अतनुशरलीलया कंदर्पबा
णविलासेन मां तदहंति कीदृशी मां कुसुमवत् पुष्पवत् सुकुमारंम श्रीः
८२

कामरूतानतनुः शरीरं यस्याः सा कीदृशी अतनुःशरलीलया अतिविष
मं अतिदारुणं शीलं स्वभावो यस्याः सा बाणो नाहं क्षतं किंपते पुष्पादि
ना ७ [illegible] ७ नलिनवनवेतसा गलिताः मातिलजी हृष्टमे
मन्येयत्त्वा परिसंख्यातावत वेतसायथासा अहह कुंजे किं वसा
मि अपितु मसान्येव अत्रन: असमूल्लाकुरकलनेनैव विधामपिमा
मधुसूदनः हृष्टमे चेतसामपि नस्मरति आश्चर्यमित्यर्थः ८ हरिचे
रणाति हरिचरणशरणनाथस्य सजयदेवकविरस्य भारतीगीतस्पी
२

गी॰गो॰ ७३ सरस्वती भक्तानां हृदि मानसे वसतु कीदृशी भारती कोमला अतिनि
ष्ठुरवाणी कलावती कवित्वकलायुक्ता च केव युवतीरिव यथा नायक
हृदये कोमलकलावति स्त्रकुमारांगी चतुःषष्टिकामकलायुक्ता च नायि
कास्ति ९ छद्मस्य विलंबेन कमाह तत्किमिति १ कांतः छद्मः संकेती ह
नं अभिसरणस्थानं संपादितः मंजुमनोहरः वंजुललताकुंजः वेतसल
तागृहं तस्मिन्नपि यस्मान्नागतः नायातः तस्मात् कारणात् कामपि
कामिनीं नायिकां अभिसृतः किंवा अथवा बंधुभिर्मित्रैः कलाकेलिभिः श्री: ७३

हास्यक्रीडाभिः बद्धः यंत्रितः उत अथवा अंधकारी ॥ नमो युक्तेव नीपो
पवनसमीपे किं भ्राम्यसि तमालिमार्गभ्रमात् भ्रमतां युज्यतु एव अभ्य
स्तस्य भ्रमाभाव इति चेत्तत्राह क्लांतमनाः सन्निभिन्नसमाकुलांतःकरणः
सन् पथि मनागपि अल्पमपि प्रस्थातुं आगंतुं अक्षमः किं असमर्थः
किं अत्र अपि राद्धः किमर्थ उक्ता चेयं नायिका उक्ता भवति सा यस्य संके
तं नागतः प्रियः तस्यानागमने हेतु चिंतयंत्याकुलायत इति ॥ अथान
अथानंतरं राधा माधवं छद्म तरेण विना आगता सखीं वीक्ष्य दुःखा ॥ एवं

गी०गो० ७४ ह्रीतं वक्ष्यमाणमाह कीदृशी सखी विशाखेन कार्यासिद्धिं आमूकां वक्तुम
क्षमा कीदृशी राधा जनार्दनं हरिं कयापि कामिन्या रमितं क्रीडितं वित
र्कमाना तर्कयन्ती कथं दृष्टवत् कामिन्यासहितं दृष्ट्वा अभिधायते तथा
प्राहेत्यर्थः रसाउन्मादिनउक्तिः

कापि मधुरिपुणेति ध्रुवपदं हे सखि कापि युवति कामि
नी मधुरिपुणा हरिणा सह विलसति क्रीडति कीदृशी सा अधिकगुणम
नः अतिशयितसौंदर्यातिशयगुणा युक्ता पुनः कीदृशी स्मरसमरोचि श्रीः ७४

तकामयुगस्योग्यः विरचितः कृतः वेशो ऽलंकारादिर्यस्याः सा पुनः कीदृ
शी गलितकुसुमेन पतित तपुष्पस्रजा दरविलुलिता ईषद्दित व्यस्ताः
केशा यस्याः सा १ ॥ [illegible] ॥ हरेः कृष्णस्य परिरंभणेन आलिंगने
न वलितः संभुक्तो ललितो मनोहरो भाविविकारो कामभावो यस्याः सा
कुचकलशयोरुपरि स्तनपटयोर्मेरलकेतरलितश्च चलो हारो यस्याः सा
२ ॥ [illegible] ॥ ३ ॥ विचलद्भिः कंपमानैः रलकैश्चूर्णकुंतलैः ललितः सुं
दरः आननचंद्रो मुखचंद्रो यस्याः सा पुनः कीदृशी तदधरपानरभसे

गी०गो० ७५ न। कृष्णस्य श्लेषणान्‌ हर्षरोमांचितानदा। रतिसुखानुभवनिद्रया यस्या
२ ... ८ पुनः कीदृशी चंचलाभ्यां कुंडलाभ्यां ललितौ सुघृष्टौ
कपोलौ यस्याः सा पुनः कीदृशी मुखरिता अव्यक्तसहिता रसना कांची
यस्मिन्‌ जघने तस्य गत्या वा चलत्वेन लोलाः चंचला ४ दयितेनेति ५ हृषि
त विलोकितेन कृष्णमुखवीक्षणेन लज्जितं संजातलज्जामित्यर्थः हसि
तं हास्यं यस्याः सा पुनः कीदृशी बहुविधपिकद्विजकलहंसानामिव
नानाप्रकारं कूजितं यत्र एतादृशो यो रतिरसः क्रीडारसः तेन रसिता हृ श्री: ७५

श्च। ५ विपुलेति ६ पुनः कीदृशी विपुलाः बहुला पुलकारोमांचा यस्या
सा पृथुमहान्‌ वेपथुः कामसंभ्रमः यस्याः सा पश्चात्‌ कर्मधारयः पुनः
कीदृशी श्वसितस्फुरणायाः सजनिता निश्वास निमीलित परमानंदावाप्ति
जनितं नेत्रनिमीलनं ताभ्यां विकसत्प्रकटीनावत्‌ अनंगकामो यस्याः
सा निमीलितत्वेन सूचितकालः सूचितः ६ श्रमजलेति ७ पुनः की
दृशी श्रमजलकणभरेण स्फुरणायासघर्मजलाधिक्येन सुभगं शरीरं
मनोज्ञं यस्याः एतेन सा त्विकभावो व्यतिस्फुरिता सात्विकभावाः पूर्वमुक्ता

गी०गो० ७६ पुनः कीदृशी उरसि वक्षःस्थलोपरि ॥ पतितो वक्षःस्थलं व्याप्य स्थितो रति
स्फारतरलहारइव तत्र धीरा कुरु सा ल ॥७॥ अ. जयदेवेति ॥ श्रीजयदेवभणिते
उक्तेवर्णितेनमित्यर्थः शांतं करोतु कीदृशं हरिमित्तं ॥ अतिललितं अति
मनोहरं ॥८॥ विरहपांडुरिति ॥ अयमखिवंद्ववदनिविषादेन सखी प्रतिब्रूते
अयं विधुः चंद्रः मम हृदये मदनव्यथा कामपीडां अतीवात्यर्थं तनोति
विस्तारयति उद्दीपकविभावत्वात् ॥ कीदृशो विधुः ॥ विरहेण वियोगेण पां
डुरं मुखांबुजं कृष्णमुखकमलं ॥ तद्द्युतिः शोभा यस्य पुनः कीदृशः वेद श्री ७६

नाभपि निरयन् ॥ आच्छादयन् ॥ पुनः कीदृशः मनोभुवा कामस्य स्कंदहृत्तमि
त्रैः ॥२॥ पूर्वगीतेन कस्याश्चित्तद्विपरीतरतियुक्तं अधुना कस्याश्चित्स्वाधी
नभर्तृकालक्षणं ॥ अस्या रतिगुणक्लृप्तपतिः प्रार्थनमुच्यति ॥ विचित्रावि
भ्रमासक्तास्वाधीनपतिकायथेति ॥ गुर्जरीरागेण ॥ ...दिनवदति ॥
विजयी मुरारी ॥ यमुनापुलिने रमते ॥ ध्रुवपदं ॥ हे सखि अधुना अस्मिन् का
ले यमुनापुलिने यद्वनं तस्मिन् विजयी जयशीलो मुरारिः कृष्णः रमते क्री
डति ॥ कथं रमते ॥ इत्यत आह रमणीवदने कांतामुखे ॥ सपुलकं रोमांचसहि

गी०गो०
८८

तं यथास्थानं तथा मृगमदेन तिलकं कस्तूरी तिलकं लिखति। कीदृशो वसंते समु-
दितः समुपचितः मदनकामो यत्र सकामेत्यर्थः। चुंबनेन वलितः संमुखी-
कृत्य संकोचितः। अधरोष्ठस्य तस्मिन् चुंबनं दत्वा तिलकं लिखतीत्यर्थः।
कस्मिन्निव कुरंग रजनीकर चंद्रे मृगमिव। लिखनीत्यर्थः। १। घनचयेति २
घनचय रुचिरे मेघसमूह मनोहरे चिकुरे केशे कुरुवक कुसुमं आश्लि-
नपुष्पवावोद पुष्पं वा रचयति। यथास्थानमर्पयति पुनः कीदृशे। तरलि-
गते चंचलीकृतानि तरुणीनां श्री कृष्णस्य आनंदमुखेन। अतिसुंदरतया वि-

श्रीः
७

क्षणार्थे। कीदृशं कुसुमं। चपला वनस्कधुम्नं विद्युदिव सकुमाशोभा यस्य त-
स्थया लक्षितया लोहितत्वात्तच्छविद्युत्साम्यं पुनः कीदृशो रतिपतिः काम-
ए वमृगः तस्य कानने। यथा मृगवासो वने तथा। चिकुरे कामध्वनिकाम-
जनके इत्यर्थः। अस्मिन्नेव मेघे विद्युद्भवति। तरुणीनां मेघसमयः कामज-
नकः इति। मेघोदये हारिणीनां अतिसुखमुत्पद्यते [illegible] ति। स घनेनि-
विडे कुचयुगले। स्तनद्वये। अमलं निर्मलं मणिसंमुक्ताहारमेव तारक-
पटलं नक्षत्रसमूहं घटयति। योजयति मृगमदरुचिः कस्तूरीदीप्तिस्तया

गी०टी० भूषिते पुनः कीदृशेन नखपदं नखक्षतं तत्तदेव शशी द्वितीयाचंद्रस्तेन भूषि
७८ ते अलंकृते गगनपक्षे श्यामनामेघा यस्मिन् ३ [illegible] ४ मृ
दुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरकतखचितकंकणमे
व मधुकरनिचयं भ्रमरसमूहं वितरति ददाति रचयतीत्यर्थः कीदृशे
भुजयुगले जितबिसलताकले सदृशीकृतमृणालखंडे पुनः कीदृशे कुस
लमेव नलिनीदलं पद्मपत्रं यस्मिन् हिमवत् शीतले पद्मिनीपत्रतुल्ये
बिसलकलेध मरसमूहस्थितीति रूपकालंकारः ४ रतिगृहेति ५ श्रीः ७८

रतेः शृंगारस्य गृहे आश्रये जघने नितं हेममणिमयरसनं मुक्तामयीमेख
ला विकिरति ददाति कीदृशे जघने विपुलमहत्तर अपघनशरीरं यस्य
अतिमांसलमित्यर्थः पुनः कीदृशे मनसिजस्य कामस्य कनकनिर्मि
नै तसिंहासन इव कीदृशे मणिमयरसनं तोरणस्य वंदनमालिका हसनं नि
दर्कं यदा राजा सिंहासने उपविशति तदा वंदनमालिका बध्यते पुनः
कीदृशे कृतवासने कृतं दत्तं वासनं वस्त्रं यस्मिन् वस्त्रोपरि मेखलाव
स्थानीत्यर्थः यद्वा कृतकामेन वासनं स्थानं यत्र ५ [illegible] चरणकीदृ

गी० गो० ७०

हृदये। पादपल्लवे यावकभरणं॥ अलक्तकपूर्णं जटनयनि करोतीत्यर्थः की
दृशे चरणकिसलये। पादपल्लवे यावकभरणे हृदयो ज्ञिति॥ कृत्स्नेन अ
नुरागातिशयात्॥ हृदये प्रापिते स्वहृदये तस्याचरणं कृत्वा यावकं र
चयतीत्यर्थः। कीदृशे हृत्कमलानिलये लक्ष्म्या॥ आश्रये कीदृशो कि
सलनुरवाग्रवरवाग्रवमणिगणाः पुष्परागादिरत्नसमूहा॥ तैः पूजिते
अर्चिते। कीदृशं यावकसरणं। वात्मा छादकं नन्वितइति॥ ६
हे सखि इति खलहलधरसोदरे खले दुर्जनि बलभद्रस्य भ्रारि गी० ७०

कुंभिकाम पिसदृशं कामपिनायिकां। सदृशं यौवनं रूपगुणादिभिस्तु
ल्यं यथा स्यात्तथा रमयति रमतिक्रीडति सति॥ इह विटपी दलताग्रे
अफलं निःफलं विरसं रसरहितं यथा स्यात्तथा चिरबहुकालं किमिव
ससंस्थितास्मि हे सखि वदकथय हलवाहकस्य सोदरइति सामिप्राये
खलइति क्रोशविभावितं॥ ७॥ हरंमति॥ ८॥ इह मयि कवि न्दे
पजयदेवकेकविराजजयदेवे॥ कलियुगकृतदुरितपापेन वसतु भन्ति
हृदनु। प्रार्थनायालटकीदृशेरसभरणेणे॥ कृष्णस्य पादसेवके चरण

गी०गो० सेवके॥ वनेरी युदपुनः। कीदृशे कृतकृत्यागुणेन॥ कृतगुणनं चिंतनं येन पु
८० नः कीदृशे मधुरिपु कृष्णस्य पादसेवके चरणसेवके॥ ७॥ नायातेति॥ कृष्ण
स्यानागमनाद्दुःखिता सखी माश्वासयंती त्याह॥ हे सखि हे इति दूत्यं कर्मकु
शले। यदि निर्दय॥ दयारहितः शठः धूर्त्तः वंचकः कृष्णो नायातो नहि
कि त्वं इयसे समुत्सामवसि॥ अनागमने कारणमाह॥ बहुवल्लभः बहवो
वल्लभाः स्त्रियो यस्य सः॥ स्वच्छंदेस्त्रिया तत्रस्थाने रमते क्रीडतीति त्वं कि
दूषणे कः अपराधः॥ हे सखि कथमंत्रागमिष्यतीत्यत आह॥ पश्यतिहेस श्रीः ८

खि अद्य मम हृदयं चेतो मनः प्रियसंगमाय कृष्णसंभोगार्थं स्वयमेव यास्य
ती इति त्वं पश्य जानाहि कीदृशं चेतः दयितस्य कृष्णस्य गुणैः सौंदर्या
दिभिः श्रीकृष्णमार्णवस्त्री कृतं पुनः कीदृशं उत्कंठा औत्सुक्यं च आर्त्तिः
कामपीडा तया भरेति॥ शाधुस्तस्मादिव स्फुटतु बहिर्भवतु॥ अपरमपि
वस्त्वंतरसंकुलेस्थानं स्थितं वसनं काया द्बहिर्भवतीति॥ अन्यो पि गुणे
रनुमिरा कृष्ट सन् प्रयातीति॥ हे सारवण्या निलेति॥ ९॥ [illegible]
[illegible] हे सखि या नायिका वनमालिनी कृष्णेन रमिता क्रीडिता सा

गी० गो०
८५

किसलयशयनेन नवपल्लवशय्यायां तल्पतां नीतो यत्र सा भवति ॥ अथ वया
वनमालिना अरमिता मादृशी सा किसलयशयनेन यतति अपितु य
नत्येवं का वा कीदृशेन वनमालिना अपि निलेन वायुना तरलं चंचलं
त् कुवलयनीलोत्पलवद्वृत्तं नयनं यस्य स तेन सा दृश्यावलोकनादि
विभावः ॥ अस्मिन् गीते संभोगो शृंगारः ॥ १ ॥ किकतितेनेति ॥ २ ॥ विकसि
तं सकुक्लितं यत्सरसिजं कमलं तद्वन्मनोहरं ललितं आननं यस्य स
वभूतेन वनमालिना या रमिता ॥ सा मनसिजविशिखेन कामबाणेन

श्रीः

न स्फुटा तीव्रविद्धा भवतीति संभोगे तु सा सा न स्फुटति स्फुटस्येति कां
॥ २ ॥ अमृतवत ॥ अमृतवन्मधुरा मृदुमनोज्ञा निमृदुवर्णा तिकोमला
मला निवचना निवाक्यानि यस्य तेन वनमालिना रमिता सा मलयनय
वचनेन मलयानिलयेन न ज्वलति न संदीप्यते ॥ संभोगवियोगे तु सा नुज्व
लत्येव ॥ ३ ॥ स्थलजल ॥ ४ ॥ स्थलजलरुहाणां ॥ स्थलजलपमानारु
चिरसहचिरैर्यणतो दृष्टा ॥ करचरणाय स्युतेन वनमालिना या रमिता
सा हिमकरकिरणेन चंद्रदीप्त्या न दहति नोपतप्ता भवति ॥ अविवसि

गी०गो०
८५

नेत्यादिना॥ कर्मधारय इति॥ संभोगे वियोगे तु सा न वहति॥ वहत्येव॥ स्थलेप
कुसुमातिलोहितत्वेनोपादानं॥४॥ सजलेति॥ सजलजलदसमुदयवदा
सान्द्रकमेघोदयवत् रुचिरोत्कंदरेण वनमालिना यारमिता सा हृदिम
नसि विरहभरेण विरहाधिक्येन न नु दलति दलत्येव विदीर्यते॥ इति संभो
गवियोगे तु न दलति॥ अपि तु दलत्येव ५॥ कनकेति॥ कनकनिकष
स्वच्छवर्णरेखायाः रुचिरिव रुचिर्यस्य तादृशं॥ अतिविमलं वसनं वस्त्र
यस्य पीतांबरेत्यर्थः॥ तेन वनमालिना यारमिता सा परिजनहसनेन सो

श्रीः
८५

कहास्येन सखीहास्येन॥ न श्वसिति॥ संभोगे वियोगे तु परिजनहसनेन स
पत्नीहसनेन॥ श्वसत्येव॥६॥ सकलेति॥ सकलभुवने त्रैलोक्ये ये ज
ना युवानस्तेभ्योपि वरेण्यश्रेष्ठः न तरुणेन यूना अतिकरुणेन अतिद
यावता वनमालिना यारमिता रुजं पीडां ... इति संभोगे वियो
गे सा रुजं वहत्येव कीदृशेन वक्ष्यमाणेन॥ अतिकरुणेन करुणाद्या माति
कीर्तेति ... नेत्यर्थः॥७॥ श्रीजयदेवेति॥८॥ अनेन श्रीजयदेवेन भ
णितं यदद्भुतं गीतरूपं॥ तेन हरिरपि भक्तानां वैष्णवानां हृदया विशं॥ अ

गी०गो० ७

विश्लेषं नु पुरा स्नेहात्त्वात् । कीदृशे हृदये । हरिचरणचिंतनाग्नि विनिष्ट
पापमितिभावः । चमनाभवति । पीडयंतमेलया निलमार्थयते । हेमन्ते
भवानंदनं कामप्रमोदजनक चंदनानिलमलयवातप्रसीदमनो परिप्रस
न्नो भवेरे । इत्याक्षेपसंबोधनं दुःखकारित्वात् । दक्षिणवातपवनवाम
तांप्रतिकूलत्वं मुंचत्वं जहे जगत्प्राणजगतां प्राणभूतलक्षणं । अल्पक
लमाधवं पुरो विधाय क्षणमेकं त्वं मम प्राणहरो भविष्यसि । प्राण
गमनसमये हि कृष्णदर्शनं । आनिदुर्लभं इति जनतो प्राणस्य प्राणहर

श्रीः ७

क्षणं सम्मुचितमितिभावः ॥ २ ॥ पुनरपि सखी प्रत्याह ॥ रिपुरिति ॥ आ
सश्रयं सखी संवासः सखीभिः सहसम्यग्वासो वासस्थानं रिपुवाश
त्रुरिव मम मृदुनीतिसंतापयति ॥ हिमानिलः शीतलवायुः सखी वह्नि
रिव मम मनो दुनोति स कथारश्मिश्चंद्रो विषमिव दुनोति तस्मिन्हृदये
करुणारहिते प्रिये एवं अविचारितमेव मम हृदये पुनः पुनरपि बला
त्म्यवलतेसमगच्छतीति विचार्यमाणम पितथैव निर्गच्छतीत्यर्थः यतः कु
लपदर्शनी लोलत्लाक्षीणां वामः क्रूरः कामो निरंकुशः । अतिशय

गी०गो० ८४ नस्वेच्छयाचारी॥ अपरंतत्रइत्यर्थः तंकुरुकरसिकरसे॥ निधिहेवर्तते
न्याय्यः॥ कामोवामः स्वभाववतइतिपुनरपिजीवितनिरपेक्षत्वेनमलया
निलादीनुपस्त्याह कुरुहेपंचबाणकामत्वं ममप्राणानुग्रहाणि यथापु
नरपिअहंगृह्णेनआअयिष्येनयास्यामीतथाप्राणानुग्रहाणेत्यर्थः
हेहुताशभगिनियमभगिनीयमुनेत्वंक्षमयाशांत्याकिंमममगि
न्यास्त्वशांतिनेचिंतेतिभावः त्वंतरंगैः स्वकीयैः कल्लोलैः अंगानिसि
चनेनममदेहदाहः शरीरसंतापः शाम्यतुमरणमेवभवत्वित्यर्थः श्रीः ८४

सांद्रेतिक्षेपकः गोविंदस्यपदारविंदं श्रीकृष्णचरणं वंदामहेनमा
मः किमर्थं अशुभस्कंदाय॥ अशुभनाशार्थं॥ कथंभूतंपदारविंदंसा
द्रानंदाः निबिडहर्षाः पुरंदरादिविबुधवृंदा देवाः॥ तेषांवृंदसमूहैः
रमंदादरादतिशयितबहुमानाद्दानाहानम्रैः॥ आसमंतान्नतियु
क्तैः कर्तृभूतैः मुकुटानांमिंदुनीलमणिभिः नीलवर्णैः मणिभिः
करणभूतैः सदाशोभितं इंदीवरभ्रमरोयत्रपुनः कीदृशं स्वच्छंदयथा
स्यात्तथा मकरंदसुंदरं मकरंदं पुष्परसवन्मधुरं यथास्यात्तथासा

गी०गो० नथागलस्तामंदाकिन्या विङ्गाथामेदुरंस्ताङ्क्षाम्गिर्ग्यंदृत्यर्थः श्रीपु
८५ रुषार्थः श्रस्तुभस्कंदायपापनाशाय.

अथकथ
मपियामिनी विनीय स्मरशरजर्जरितापिसाप्रभाते अनुनयवचनं
वदन्तमग्रे प्रणतमपिप्रियमाहसाभ्यसूयं १
रजनिजनितगुरुजागर रागकषायितमलसनिमेषं वहतिनयनमनु
रागमिव स्फुटमुदितरसाभिनिवेशं १ याहिमाधवयाहिकेशव मा श्रीः ८५

वदकैनववादं तामनुसरसीरुहलोचन यातवहरतिविषादं
कज्जलमलिनविलोचनचुंबन विरचितनीलिमरूपं दशनवसन
मरुणेनवकृष्ण तनोतितनोरनुरूपं २ वपुरनुहरातितवस्मरसंगर ख
रनखरक्षतरेखं मरकतशकलकलितकलधौतलिपेवरतिजयले
खं ३ दशनपदंभवदधरगतंमम जनयतिचेतसिखेदं कथयतिकथ
मधुनापिमयासह तववपुरेतदभेदं ४ चरणकमलगलदलक्तकसिक्त
मिदंतवहृदयमुदारं दर्शयतीवबहिर्मदनद्रुम नवकिसलयपरिवारं

गी॰गो॰ ८६

५ बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं कथमथ वंचय
से जनमनुगतं असमशरज्वरदूनं ॥ भ्रमति भवानबलाकवलाय वने
षु किमत्र विचित्रं प्रथयति पूतनिकैव वधूवध निर्दयबालचरित्रं ७
श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं शृणुत सुधामधु
रं विबुधा विबुधालयतोपि दुरापं ८ तदेवं प्रपन्नायाः प्रसरदनुरागं बहि
रिव प्रियापादालक्तच्छुरितमरुणच्छायहृदयं ममाद्य प्रख्यातप्रणयभ
रभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति ९ अंतर्मो

श्री: ८६

हनमौलिघूर्णनचलन्मंदारविस्रंसन स्तब्धाकर्षणदृष्टिहर्षणमहामं
त्रः कुरंगीदृशां दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः कं
सरिपोर्व्यपोहयतु वः श्रेयांसि वंशीरवः [illegible]
[illegible] नागरश्चतुरो नारायणो यश्च सप्तथा
अधुना राधा प्रियं प्राप्तरतं दृष्ट्वा साभ्यसूययामेवाह ॥ [illegible]
[illegible] अथानंतरं कथमपि सकष्टया मिनी रात्रिं नीत्वा स्थित्वा सा राधा
प्रियं प्रभसाभ्यसूयं सेर्ष्यं यथा स्यात्तथा आह किं वक्ती कीदृशी सा

गी०गो० ८७ रत्नाकरे मकराणि : जर्जरितापि विद्रुमापि कीदृशं प्रियं प्रभाते प्रातःकाले । अ
नुनयवचनं ॥ अनुनयः प्रबोधाय वाक्यं वहंतं पुनः । कीदृशं ॥ अये प्रणत
मपि नम्रमपि । अस्मिन् खंडिता नाम वर्णयंते ॥ नहुष्यसमयं यस्याः प्रे
यान्योपभोगचिह्नः ॥ भोगलक्ष्मीं कितः प्रातः रागछैत्सा । हि खंडितानि
द्राकषायकलुषीकृतताम्रनेत्रा ॥ नारिलखञण विशेषविचित्रितांगः
अस्याकुतोपिकुतोपि गृहमेति पतिः प्रभाते सा खंडितेक थिता कविभि
पुराणैः ॥ अथ रस्याव नमेवा हरणभैरवतद्व्यसणं ॥ सरोवरस्थे स्फुट श्रीः ८७

कस्य मंडपे सरोरुहे : शंकर मंचयं तिनालपमेदं प्रनपन्नगीतां शेरीत्नु
नीरहभैरवीय मिति ॥ रजनीति १ हरिहरीति ॥ तामनुसरेति ॥ ध्रुवपदं ॥ हरि
हरि खेदानुकारे अव्ययं हे केशव यांहि इतो गछ हे माधव यांहि कोपाधि
कयेन ॥ हि कृ ति : किं तव वादे कैचवकं कपटवाक्यं ॥ मां वद हे सरसी । हलो रु
चनकमलनयनानायिकामनुसरगछ यात व विषादमनस्तापं हर त्नि
इरीकरोति ॥ कथं कि दृशार तामित्यत आह । हेरुस्मा तव नयनं स्फुटयंक
तस्या अनुरागमिव बहति धारयति ॥ कीदृशं नयनं रजनिजनितेनरा

श्री.

गी०गो० ८८ त्रिफलेनगुरुणानिशायनजागरणेण ... लसः मेषः पक्ष्मचलनं य
स्य कीदृशं अनुरागः उदितरसाभिनिवेशं उदितः कथितः रसस्य अन्य
कामिनीविषयकशृंगाररसस्याभिनिवेशात्तस्यरतायेन । मायालक्ष्मीत
स्याधवप्रत्येनेनतस्यातिलेननेत्रांचलस्पर्धातिमिंकेशवदत्तेनेनक्लेशना
शंकत्वेनापिक्लेशाशब्दामनुचिंतमितिद्योतितं [illegible] हेलक्ष्म
नवअरुणतांबूलंरागेणलोहितदशनवसनं अधरः तनोः शरीरस्यानुरू
पसादृश्यंतनोतिविस्तारयति कीदृशंदशनवसनं कज्जलेन अंजनेनश्या श्रीः ८८

मं यत्त्विलोचनंनेत्रंतस्यचुंबनेनविरचितंकृतं । नीलिमरूपं श्यामतास्व
रूपंयस्यअरुणाधरस्यनेत्रचुंबनेनश्यामताप्रतिपादितास्वरूपत्वं अ
न्यकामिनीलक्ष्मस्यानुरागः सूचितः । वपुरनुहरति । हेलक्ष्मनववपुः श
रीरंजितयलेखं स्मरत्तविजयप्रशस्तिनलिनपत्रं अनुहरति अनुकरोति
कीदृशंवपुः स्मरसंगरेकाममुद्धेकरराणांनीरूपानांनखानांक्षतानांयैवर
खाद्यत्र कस्येवमरकतमकरतीलस्मागिरवे कलितानिमिताक्षरवि
भ्रसहेश्च वपुनोनीलत्वात् नखक्षतस्फाटिकत्वात् मरकतखंडापितः

गी०गो०
८९

सौवर्णाक्षरसासाम्यं ३ [illegible] न्नेवं वस्तु शरं मनोहरं हृदयं मदनेन
मस्यकामवृक्षस्य हृदयान्तर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमू
हं बहिर्दर्शयतीव प्रगटयतीव। कीदृशं हृदयं। अरुणकमलादन्यस्त्री पादप
द्मात्तगलक्ताश्रवंती पतता अलक्तकेन सिक्तमुक्षितं किसलयपदेनैव नू
तनत्वाभिधानात् पुनर्नवपरं अत्यंतनवत्वसूचनार्थ परिवारः परिसरः
मूहवेष्टनेपि वेति विश्वः ४ [illegible] भवदधरगतं तवाधरोष्ठवर्तमानं
दशनपदं रसस्पकामिनीदत्तं क्षतं मम चेतसि मनसि खेदं संतापं जन

श्री:
८९

यति। करोतीत्यर्थः। दशनपदः। अधुनापि इदानीमपि तव वपुः मया
सह अभेदं कथं कथयतीत्यर्थः। न विद्यते भेदो यस्य। पूर्वं मया सह तव वपु
षो भेदो नासीत् निश्चितं। इदानीं तु तत् विपरीतं मिति मया सह भेद एव निश्च
य इति क्षेपकः ५ [illegible] मूनमपि निवितर्के हृत्स्यं तव मनोपि
चित्तमपि वहिरिव मलिनतरं कथं मभविष्यतीति नूनं तर्कयामि त्वया क
थं ज्ञातं इत्यत आह अथ अन्यथा अनुगतं सेवकं जनं मन्मूक्षणं कथं व
ञ्चयसे प्रतारयसि। कीदृशं जनं। असमशरः कामस्तस्य ज्वरेण पीड्यमा

गी॰गो॰
१०

ऽन्नमुपनतं ॥ अतः हन्तत्वंकौटिल्यमेवेति ॥ ... ॥ अबल
कंबलायुक्ष्यीणां अनुसनार्थं भवान् वनेषु ऽरण्येषु भ्रमति ॥ अत्राक्षिपाप
किंचित्रं किमाश्चर्यं यतः पूतनिकैव राक्षसी बकधवधे स्त्रीघातनार्थं
निर्दयं स्यात् हितं बालचरित्रचेष्टितं प्रथयति ख्यापयति हे व धृवनिर्दय
तिसंबोधनं वा शिशुना त्वया राक्षसी हता तास्मिंस्त्वयि युनि संप्रतिकोम
लांगीनामास्माकं मारणेन किंचित्रमिति भावः ॥ ७ ॥
हे विबुधाः पंडिताः ॥ श्रीकः श्रीसुयुक्ता जयदेवेन भणितं उक्तं श्लोकमेतन्निर्व

श्री:
१०

र्णितः खंडितयुवतिविलापं ॥ नः शृणुत ॥ आकर्णयत कीदृशं विलापं सु
धामधुरं ॥ सुधा अमृतं तद्वत् मधुरं मनोहरं ॥ पुनः कीदृशं विबुधालयतो
पि स्वर्गादपि दुरापं दुर्लभं भक्त्या इत्यर्थः ॥ ८ ॥ तवेति ॥ हे कितव वंचक त्वदाले
कस्य वदनं प्रेक्षायाः लोकप्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भं
गेनाजातो सवयश्लोकः तस्मादपि मम अधिकं अपि यन्निर्वचनीयं जन
यति ॥ कीदृश्याः ममतवेदृहृदयं वक्षःस्थलं परात्या कीदृशं हृदयं प्रियायाः
पादालक्तकेन छुरितं आम्र ॥ अतएवं अरुणवत्संध्यारागवत्तन्नोत्तिलुक्षी

गी०गो० ९९ लमस्येति ॥ अरुण छायामिति ॥ पाठे अरुणरक्ताया द्युतिर्यस्य सा दरोत्
दयं समीक्ष्य तेन वाक्षिप्तरदनुरागमिव बाह्य प्रहसन अनुरागो यस्य रागो
हि अरुणवर्ण इति ॥ अधुना कविर्भक्तानाशिषयति आननलिति ॥ अयं नंद
नंदनः लक्ष्मः जगदानंदाया स्कलोक स्वस्वार्थं भवतु ॥ कीदृशः श्रीडाया चंच
लं लज्जया चलमानं नयनयोर्नेत्रयो रंचलं अपाङ्गं ॥ करपक्षः एव आनने
एव मुखे आधाय अर्पयित्वा स्मेरं ॥ अतिस्मयेन स्मेरमुखं ईषद्धास्ययुक्त
मुखः स्मेरमुखे कारणमाह ॥ काम्यिनूसतिपतिउष ॥ अच्युते लक्ष्मी श्री ९९

लनिचोलं वस्त्रं यस्य ॥ श्याम वस्त्रधरं विलोक्य दृष्ट्वा ॥ अनुचराधा याउरः
वक्षस्थलं संवीतं पीतं ॥ शुकं परिधानी कृतपीतांबरं च किंतु ॥ स विस्मयं वि
लोक्य सखी मंडले सखीसमूहे स्वैरं शनैः हसति सति वस्त्रपरिवर्तनं मा
लोक्य हासइत्यर्थः विलोक्य इति विस्मयान्वितः विषयी इति भावप्रसि
द्धार्थः ॥ ॥ इति श्री गीतगोविन्दे जयदेव कृते विलक्ष्य लक्ष्मीपति नी
माध्यमः ॥ सर्गः ॥ ८ ॥ नाम मन्मथ खिन्ना रति रस भिन्ना विषाद संपन्ना ॥ अ
नुचिंतित हरिचरित्रां कलहांतरितामुवाच सखी ॥ १ ॥ [illegible]

गी०गो०
१२

हरिरभिसरतिवहतिमधुपवनेकिमपरमधिकसुखंसखिभवने १ माध
वेमाकुरुमानिनिमानमये ॥ ध्रुवपदं ॥ तालफलादपिगुरुमतिसरसं कि
विफलीकुरुषेकुचकलसं २ कतिनकथितमिदमनुपदमचिरं मापरि
हरहरिमतिशयरुचिरं ३ किमितिविषीदसिरोदिषिविकला विहसति
युवतिसभातवसकला ४ सजलनलिनदलशीतलशयने हरिमवलोक
यसफलयनयने ५ जनयसिमनसिकिमितिगुरुखेदं शृणुममवचनं
मनीहितभेदं ६ हरिरुपयातुवदतुबहुमधुरं किमितिकरोषिहृदयमति श्रीः

विधुरं ७ श्रीजयदेवभणितमतिललितं सुखयतुरसिकजनंहरिच
रितं ८ स्निग्धेयत्परुषासियत्प्रणमतिस्तब्धासियद्रागिणि द्वेषस्था
सियदुन्मुखेविमुखतांयातासितस्मिन्प्रिये युक्तंतद्विपरीतकारि
णितवश्रीखंडचर्चाविषं शीतांशुस्तपनोहिमंहुतवहः क्रीडामुदो
यातनाः ९ इतिश्रीगीतगोविंदेमुग्धमुकुंदोनामनवमःसर्गः ॥ अथतां
मन्मथखिन्नांरतिरसभिन्नांविषादसंपन्नां ॥ चिंतितहरिचरितांकलहां
तरितामुवाचरहःसखी ॥ ग्रंथ ॥ अथागतांसखींतांराधाप्राह ॥ उं

गी०गो० वती॥ कीदृशीं तां मन्मथेन कामेन खिन्नां॥ दुःखितां दीनां पुनः कीदृशीं रति
९३ सेन खिन्नां रहितां॥ अत एव पुनः कीदृशीं॥ विषादेन दुःखेन संपन्नां युक्तां॥
पुनः कीदृशीं॥ अनुचिंतितं ध्यातं हरिचरितं यया तां॥ हस्य विलासो यया तां
कलहेन भीतिकलहेन अंतरितां॥ व्यवहितां॥ अत्र कलहान्तरिता नायिका
वर्ण्यते॥ तल्लक्षणं॥ भर्तारं॥ पाणौ श्वशुरं प्रणयकोपभरेण भीतिया चाटुका
रमपि निरस्य धार्यपश्चात्॥ संतप्यते मदनवह्निशिखा रहस्यैर्बाष्पाकुला
तु कलहान्तरितेति सा स्यादिति॥ [illegible]॥ हरिरभिसरतीति॥ श्री: ९३

माधोमा नममेयाति॥ ध्रुवपदं॥ अयं हे मानिनी अभिमानवति राधे हेअ
मानम् अभिमानं मा कुरु मा कार्षीरिति प्रार्थनायां लोट् स्यात्॥ मधुपवनेन व
संतवायावहति सति हरिरभिसरति॥ स्वयमेव त्वदीयसंकेतभूमिमा
गच्छति किं खेदराधे भवने गृहेपि अपरं अधिकं सुखं किं त्रिलोक्यां सखी
के॥ अपि तु न किमपि नायकस्य स्वयमागमनात् कोपो न युक्तमित्यर्थः
॥१॥ तालफलादपीति॥ हे राधे घनात्फलादपि काठिन्येन स्थौल्येन च
गुरुत्वेन च तालफलादपि गुरुं अधिकं कुचकलशं स्ववक्षःस्थ किं किमि

गी० गो० २४ निविफलीकुरुषे अस्मत्स्पर्शव्यापारपरिशीलनाभावात् कीदृशं अतिस
रस अतिशयरसंयुक्तं तस्मिन्नदृष्टेऽपूर्वरसाभावात् हृदया हा रहस्कारमिति
यावत् २ कति न कथितेति ३ हे राधे इदं अनुपदं स्थानं अविरसाप्रतं कति
कति वासरात्रं कथितं उदितं किंतु कथितमेव किं तद्द्विता त्वं अभिशयर
चिरं अतिकमनीयं हरिलक्ष्ममापरिहरे ७ किमिति ति ४ किंचित्कला असं
वधाने द्वियालं किमिति कस्मात् विषीदसि
दुःखिता भवसि रोदसि च क्रंदसि मदुक्तनिराकरणात् इदानीं विषादरोद श्री २४

नं च येथे मिति सकलाः संपूर्णा युवतिसभा तरुणीसमाजः भवन्त्या विहस
